# माध्यमिकशिक्षापाठ्यक्रमः
# संस्कृतभाषाव्याकरणम्

कक्षा : ९-१० विषयसङ्केतः Slb. 013 (कक्षा ९)Slb. 014 (कक्षा १०)
पाठ्यघण्टाः ४ वार्षिककार्यघण्टा : १२८

## १. परिचयः

संस्कृतं प्राचीनकालादाविश्वं प्रवहन्ती ज्ञानधारा वर्तते । संस्कृतस्य विश्वव्यापि महत्त्वं बहूपयोगित्वञ्च सर्वत्र स्वीकृतं समादृतञ्चास्ति । संस्कृतवाङ्मये निबद्धैरगणितैर्लोकोपयोगिविषयैर्मानवः स्वहितं परहितञ्च साधयितुं शक्नोति । अस्मिन् वाङ्मये तादृशं तत्त्वं सन्निहितं वर्तते यन्मानवं सन्मार्गे नियोज्य सत्कर्मणि प्रवर्तितुं सततं प्रेरयति । संस्कृतं न केवलं संस्कृतेः परम्परायाश्चैव वाहकमपि तु स्वास्थ्य-खगोल-ज्योतिर्विज्ञानादिविषयाणां प्रत्यक्षज्ञानेन स्वस्य विज्ञानत्वमपि प्रमाणीकर्तुं क्षममक्षयं विद्यावैभवं विद्यते । भाषिकज्ञाननैपुण्यार्जने संस्कृतस्यातुल्या भूमिका वरीवर्ति । संस्कृतं भाषाविज्ञानस्याध्ययनायाक्षयं स्रोतो वर्तते । एतदेव मानवजातेरितिहासप्रकाशको ज्ञानमयप्रदीपरूपः सर्वाधिकप्रमाणपुष्टो वाङ्मयराशिरप्यस्ति । विज्ञानविशारदैरन्तरिक्षविज्ञानस्य कार्यजातं सौकर्येण साधयितुं संस्कृतमेव सर्वोपयोगि साधितमस्ति । इमामेव कार्यपीठिकां समाश्रित्य वर्षाणां सार्धदशकस्याभ्यन्तरे सुसाङ्ख्योपकरणं संस्कृतभाषानिबद्धं निर्मातुमुपक्रमः प्रचालितोऽस्ति । अनेनेयं परिस्थितिराकल्यते यद्ये संस्कृतं न जानन्ति ते भविष्यति सङ्गणकाद्यत्यावश्यकोपकरणानां चालने काठिन्यमनुभविष्यन्ति । तादृशीमवस्थां निवारयितुम्, विश्वव्यापिनीषु प्रतिस्पर्धासु उत्कृष्टकौशलं दर्शयितुम्, लोकोपकार-युगोपकारयोर्भावनां विशदीकर्तुं स्वकर्तव्याकर्तव्यं सम्यगवबोद्धुञ्च संस्कृतस्य ज्ञानं परमावश्यकं भवति । अत एव इदानीन्तन्यां परिस्थितौ संस्कृतस्य पठनं पाठनं च सर्वेषां कृते सर्वथा हितकारकमेव न कदाप्यहितकारकमिति नात्युक्तिः । एतादृशान्महिमशालिनः सर्वजनहितसाधकात् संस्कृतान्न कोऽपि वञ्चितो भवेदिति विचारसारेण विद्यालयस्तराय संस्कृतस्य पाठ्यक्रमा निर्मिताः सन्ति । तेष्वयमन्यतमयत्नो वर्तते । संस्कृतभाषाव्याकरणतर्कशास्त्राणां समवेतज्ञानप्रदानमस्य पाठ्यक्रमस्य नूतनवैशिष्ट्यमस्ति ।

एतस्मिन् पाठ्यक्रमे संस्कृतस्य सर्वाधिकप्रभावकारिशिक्षणाय नैकविधा उपायाः प्रदर्शिताः सन्ति । विषयवस्तुनो माध्यमेन भाषिककौशलार्जनं भाषाभ्यासेन विषयानुशीलनञ्चेति मिथो विधिना विद्यार्थिषु प्रावीण्याधानं शीर्षलक्ष्यं वर्तते । भाषाव्याकरणयोरनुकार्यप्रधानस्य ज्ञानस्याभावेन विद्यार्थिभ्यो महती हानिर्जायते । हानिमिमां निवार्य विद्यार्थिषु भाषिकज्ञान-सदाचारनिर्माण-राष्ट्रहितचिन्तनादिगुणगणानां युगपदेव सम्भरणस्योद्देश्येन ९-१० कक्षयोः संस्कृतभाषाव्याकरणस्य पाठ्यक्रमोऽयं विकसितो वर्तते । अत्र भाषा प्राचीना सत्यपि सामयिकविषया नूतनरीत्या समाविष्टाः सन्ति । शिक्षणस्य आधुनिकविधिसिद्धान्तौ अनुसृत्य विकसितेऽस्मिन् पाठ्यक्रमे लोकरुचि-हितावश्यकताप्रतिपादकानि विधावैविध्ययुतानि पाठ्यवस्तूनि निर्धारितानि वर्तन्ते । संस्कृतं सरलतममधिकतमप्रभावकारि च विधातुं विद्यार्थिहितानुकूलो विषयोऽत्र विन्यस्तोऽस्ति । प्रतिपाठं प्रसिद्धानां छन्दसां परिचयप्रदानं पाठ्यक्रमस्य नवीनावधारणा वर्तते येन संस्कृतस्य छन्दोबद्धानां नैकविधानां वाङ्मयग्रन्थानां स्वाध्ययनमपि सुकरं भवेदित्यपेक्षितमस्ति । पाठ्यक्रमस्येयं संरचना संस्कृतं प्रतिजनं प्रतिजनपदञ्च प्रापयितुं दिङ्निर्देशनं विदधातीति विश्वस्यते ।

पाठ्यक्रमेऽस्मिन् पाठ्यक्रमनिर्माणस्याद्यतनविधिरनुसृतोऽस्ति । परिचयम्, स्तरगतयोग्यताम्, कक्षागतशिक्षणोपलब्धिम्, विषयवस्तुनः क्षेत्रक्रमौ, शिक्षणसहजीकरणप्रकियाम्, विद्यार्थिमूल्याङ्कनञ्च समाविश्यास्य विकासो विहितो वर्तते । पूर्वापरकक्षयोरानुकूल्येन लम्बतासन्तुलनत्वेन च विषयवस्तु विन्यस्तमस्ति । प्रतिकक्षं भाषा-व्याकरण-तर्कशास्त्रखण्डानां शिक्षणस्योपलब्धीः सूत्रगतरूपेण निर्दिश्य मूल्याङ्कनविधावधुनातनी प्रक्रियावलम्बिता वर्तते । आधारभूतस्तरस्य ज्ञान-शिल्प-क्षमतादिकौशलं प्रवर्ध्य परिष्कृत्य चैकादशद्वादशकक्षयोर्दक्षतां समर्ज्य तत उच्चशिक्षायां नैपुण्यमधिगन्तुमयं पाठ्यक्रम आधारशिला सेत्स्यतीति विश्वस्यते ।

## २.	स्तरगतयोग्यताः

**माध्यमिकस्तरे ९-१० कक्षयोः संस्कृतभाषाव्याकरणविषयमधीत्य विद्यार्थिनोऽधो निर्दिष्टेषु विषयेषु क्षमा भविष्यन्ति-**

**भाषाखण्डः**

१. पाठ्यवस्तुभाषिकप्रयुक्त्योः कौशलप्रदर्शने
२. विविधविधानां माध्यमेन विचारचिन्तनानुभवानामभिव्यक्तौ
३.	नैतिक-सामाजिक-संस्कृतिक-व्यवहारकुशलव्यक्तित्वनिर्माणे
४. राष्ट्रस्य मौलिकसंस्कृति-सभ्यतेतिहास-गौरवास्पदसम्पदां संरक्षणप्रचारणयोः
५. शिष्टाचारेण भाषिकशिल्पानां प्रयोगे
६. प्राचीनज्ञानराशौ सन्निहितस्य वैज्ञानिकचिन्तनस्य परिशीलने
७. स्वास्थ्यसंरक्षणाय गार्हस्थ-प्राकृतिकोपायावलम्बने
८. वक्तृताप्रवचनादिमाध्यमेन सामाजिकजागृत्यभिवर्द्धने
९. सर्जनात्मकाभिव्यक्तिकौशलप्रकाशने
१०. उच्चस्तरीयविषयवस्तुभाषिकज्ञानार्जनायावश्यकसामर्थ्योद्भावने

**व्याकरणखण्डः**

१. वर्णानां स्थान-प्रयत्न-संज्ञानां प्रत्याहारगतवर्णानाञ्च प्रयोगे
२. पाणिनीयव्याकरणशास्त्रीयपारिभाषिकसंज्ञानामवबोधे प्रयोगे च
२. ससूत्रं पञ्चसन्धिप्रक्रियाज्ञाने प्रयोगे च
३. सुबन्तपदानां ससूत्रं रूपसिद्धिप्रक्रियावबोधेन प्रयोगकौशलप्रदर्शने
४. अव्ययशब्दानां ससूत्रं पदत्वसाधने अर्थानुकूलप्रयोगे च
६. निर्दिष्टसूत्र-वार्तिक-परिभाषा-कारिकाणामर्थनिर्वचनेन प्रयोगव्यापारे
७. साधितपदानामर्थानुरूपप्रयोगेण वाक्यानुच्छेदनिबन्धरचनायाम्
८. संस्कृतव्याकरणस्याधारभूतनियमानाश्रित्य भाषाप्रयोगस्य नैपुण्यार्जने

**न्यायखण्डः**

१. न्यायवैशेषिकशास्त्रयोर्बहुधा प्रयुज्यमानानां निर्दिष्टपारिभाषिकपदानामवबोधपूर्वकं सोदाहरणं प्रयोगे
२. वैशेषिकदर्शनाभिमतसप्तपदार्थानामुद्देशे
३. वैशेषिकदर्शनप्रतिपाद्यसप्तपदार्थानां सामान्यनिर्वचने
४. न्यायदर्शनाभिमतप्रमाणानां सामान्यतो विश्लेषणे
५. वैशेषिकदर्शनाभिमतसप्तपदार्थेषु न्यायदर्शनाभिमतषोडषपदार्थानामन्तर्भावकरणे च

## ३. शिक्षणोपलब्धिः

कक्षा ९

**भाषाखण्डः**

श्रवणं भाषणञ्च

| शिक्षणोपलब्धयः | शिक्षणोपलब्धीनां विस्तरः |
|---|---|
| १. श्रुतानां गद्यांशानां वाचनम् | १.१ गद्यांशं श्रुत्वा तदनुरूपं वाचनम्<br>१.२ पठितस्य गद्यांशस्य नियमानुकूलं भाषणम्<br>१.३ गद्यांशगतपदवाक्यानां सार्थबोधमुच्चारणम् |
| २. यथालयं पद्यानां वाचनम् | २.१ श्रुतस्य पद्यस्य लयानुशीलनम्<br>२.२ पाठस्थपद्यस्य यथालयं गायनम्<br>२.३ पद्यस्थपदानां लयानुकूलं वाचनम्<br>२.४ पद्यं श्रुत्वा तद्गतभावप्रकटनम् |
| ३. पठितपदानामर्थापनेन वाक्येषु प्रयोगः | ३.१ पठितपदानां सन्दर्भानुकूलमर्थप्रकटनम् |

| | |
|---|---|
| | ३.२ अर्थं श्रुत्वा पाठस्थशब्दानां कथनम्<br>३.३ पदार्थाननुशील्य वाक्यार्थप्रकाशनम्<br>३.४ पठितपदानां वाक्येषु योजनम् |
| ४. पठितविषयाधारेण प्रश्नोत्तरणम् | ४.१ पठितविषयमाधृत्य प्रश्ननिर्माणम्<br>४.२ पठितविषयेषु जिज्ञासाभिव्यञ्जनम्<br>४.३ पठितविषयाधृतप्रश्नानामुत्तरणम् |
| ५. श्रुतस्य पठितस्य वा विषयवस्तुनः सार-भाव-संरचना-क्रमाणां कथनं पाठस्थचरितानां परिचायनञ्च | ५.१ पठितस्य श्रुतस्य वा विषयवस्तुनः सारभावकथनम्<br>५.२ निर्दिष्टविषयवस्तुनो विधागतसंरचनाया अभिव्यञ्जनम्<br>५.३ निर्दिष्टविषयवस्तूनां श्रवणेन यथाक्रमं प्रस्तुतिः<br>५.४ पाठस्थचरितानां सपरिचयं वैशिष्ट्यप्रकाशनम् |
| ६. परिचितविषयेष्वाभिमतप्रकटनम् | ६.१ श्रुतस्य दृष्टस्य पठितस्य वा विषयवस्तुनः स्वशब्दैः कथनम्<br>६.२ अनुभूतविषयस्य वर्णनम्<br>६.३ अनुभूतसमस्यायाः समाधानोपायकथनम् |
| ७. पाठे प्रयुक्तानां भाषातत्त्वानां स्वरूपकथनम् | ७.१ पाठानुप्रयुक्तसन्धीनां स्वरूपनिर्धारणम्<br>७.२ निर्दिष्टानां शब्दानां धातूनाञ्च रूपावलिकथनम्<br>७.३ पाठप्रयुक्तानामव्ययपदानां निदर्शनम्<br>७.४ निर्दिष्टप्रत्ययैर्निष्पन्नानां पाठप्रयुक्तानां पदानामभिव्यञ्जनम्<br>७.५ पाठस्थवाक्येषु प्रयुक्तानां पदानां कारकविभक्तिनिर्देशनम्<br>७.६. वाक्यं श्रुत्वा तस्य लिङ्ग-वचन-पुरुषनिर्धारणम्<br>७.६. वाक्यस्य लिङ्ग-वचन-पुरुषपरिवर्तनम् |
| ८. पाठगतविषयाणां वर्णनम् | ८.१. पाठं पठित्वा तद्गतविषयानां वर्णनम्<br>८.२. काव्यपद्यश्रवणेन तद्गतसूक्तीनामाशयकथनम्<br>८.३. नीतिपद्यं श्रुत्वा तद्गतनीतिविषयप्रकटनम्<br>८.४. नीतिकथां श्रुत्वा तद्गतनीतेरावश्यकत्वनिगदनम्<br>८.५. पौराणिककथाया आकर्णनेन ततो ग्राह्यपक्षनिरूपणम्<br>८.६. प्रबन्धश्रवणेन नीतिशिक्षाया महत्त्वकथनम्<br>८.७. प्रबन्धं श्रुत्वा प्राचीनशल्यतन्त्रस्य महत्त्वनिगदनम्<br>८.८. संवादं श्रुत्वा सामाजिकसञ्जालप्रयोगस्य लाभहान्योः कथनम्<br>८.९. जीवनवृत्तमाकर्ण्य काव्यस्रष्टुर्वैशिष्ट्यवर्णनम्<br>८.१०. वक्तृतापाठं श्रुत्वा आर्यसंस्कृतेर्महत्त्वाख्यापनम् |

पठनम्

| **शिक्षणोपलब्धयः** | **शिक्षणोपलब्धीनां विस्तरः** |
|---|---|
| १. यथालयं पद्यस्य वाचनम् | १.१ लयमनुसृत्य पद्यस्य पठनम्<br>१.२ पद्यं पठित्वा यतिनिश्चयनम्<br>१.४ पद्यं पठित्वा तस्य भावप्रकाशनम् |
| २. विषयबोधपूर्वकं निर्धारितगद्यांशस्य पठनम् | २.१ गद्यांशगतपदानां द्रुतपठनम्<br>२.२ गद्यांशस्य मौनपठनेन तद्गतविषयप्रकाशनम्<br>२.३ गद्यांशमधीत्य तस्य सारसन्देशकथनम्<br>२.४ सन्धिस्थलानि निश्चित्य निर्धारितगद्यांशस्य पठनम्<br>२.५ विरामादिचिह्नानां पालनेन गद्यांशस्य सस्वरं वाचनम् |

| | |
|---|---|
| | २.६ पाठ्यांशमधीत्य प्रमुखविषयाणां सूत्रीकरणम्<br>२.७ पाठ्यवस्तूनां मौनपठनेन अज्ञातार्थानां पदानां सङ्कलनम् |
| ३. निर्धारितसंवादस्य पठनम् | ३.१ संवादं पठित्वा तस्य संरचनागततत्त्वानां सूचीनिर्माणम्<br>३.२ सख्या सह संवादस्य साभिनयं पठनम्<br>३.३. निर्धारितसंवादमधीत्य तद्गतविषयप्रकाशनम् |
| ४. निर्दिष्टविषयवस्तून्यधीत्य प्रश्नोत्तरणम् | ४.१ पठितस्य पाठस्य विषयसम्बद्धप्रश्ननिर्माणम्<br>४.२ पाठं पठित्वा विषयवस्तुनः संक्षेपेण प्रकटनम्<br>४.३ निर्दिष्टविषयवस्तुनोऽध्ययनेन तत्सम्बद्धप्रश्नानामुत्तरणम्<br>४.४ पाठमधीत्य सारगर्भितवाक्यानां भावविस्तारः |
| ५. पाठातिरिक्तानां सामग्रीणां पठनेन विषयवर्णनम् | ५.१ पाठातिरिक्ता निर्दिष्टसामग्रीः पठित्वा तासां विषयप्रकाशनम्<br>५.२ श्रुतस्य दृष्टस्य पठितस्य वा वस्तुनो विषयेऽभिव्यञ्जनम्<br>५.३ अनुभूतिमाधृत्य सामयिकविषयेऽभिमतप्रकटनम् |
| ६. पाठगतभाषातत्त्वानामनुशीलनम् | ६.१ गद्यपद्ययोः सन्धिविच्छेदपुरःसरं पठनम्<br>६.२ मात्रामनुसृत्य यथाकालं पदगतवर्णानां पठनम्<br>६.३ निर्दिष्टानां धातूनां शब्दानाञ्च रूपावल्यास्तत्प्रयोगेण निर्मितवाक्यानाञ्च पठनम्<br>६.४ पाठं पठित्वा निर्दिष्टप्रत्ययैर्निष्पन्नानां पदानां सूचीकरणम्<br>६.५ पाठाद् निर्दिष्टकारकविभक्त्योरुदाहरणानामन्वेषणम्<br>६.६ पाठस्य मौनपठनेन निर्दिष्टकालद्योतकानां क्रियापदानां सूचीनिर्माणम्<br>६.७ अव्ययपदानां पाठानुकूलमर्थनिर्धारणम्<br>६.८. वाक्यं पठित्वा तस्य लिङ्ग-वचन-पुरुषनिश्चयनम् |
| ७. पाठगतविषयाणामध्ययनेन तद्गतविषयनिरूपणम् | ७.१. काव्यपद्यपठनेन तद्गतसूक्तीनां व्यावहारिकत्वप्रकटनम्<br>७.२. नीतिपद्यं पठित्वा तद्गतनीतिविषयस्य व्यवहारोपयोगित्वसाधनम्<br>७.३. नीतिकथाया अध्ययनेन तद्गतनीतेरादर्शमयत्वसाधनम्<br>७.४. पौराणिककथायाः सम्यगध्ययनेन तद्गतचरित्राणां वैशिष्ट्यनिगदनम्<br>७.५. नीतिप्रबन्धं पठित्वा जीवने नीतिशिक्षाया आवश्यकत्वनिरूपणम्<br>७.६. स्वास्थ्यप्रबन्धं पठित्वा प्राचीनशल्यतन्त्रस्य वर्तमानचिकित्सायां प्रभावनिगदनम्<br>७.८. संवादं श्रुत्वा सामाजिकसञ्जालस्य हितकरप्रयोगविधिनिरूपणम्<br>७.९. जीवनवृत्तस्य पठनेन काव्यस्रष्टुः योगदानकथनम्<br>७.१०. वक्तृतापाठं पठित्वा आर्यसंस्कृतेर्वैज्ञानिकत्वप्रतिपादनम् । |

लेखनम्

| **शिक्षणोपलब्धयः** | **शिक्षणोपलब्धीनां विस्तरः** |
|---|---|
| १. पदानां वाक्यानाञ्च शुद्धतया लेखनम् | १.१ पदानां वाक्यानाञ्च श्रुतलेखनम्<br>१.२ पदानां वाक्यानाञ्च यथावल्लेखनम् |

| | |
|---|---|
| | १.३ अशुद्धिनिराकरणेन पदानां वाक्यानाञ्च लेखनम्<br>१.४ पठितपदानां शुद्धलेखनम् |
| २. पठितपदानामर्थानुकूलवाक्येषु योजनम् | २.१ पठितपदानां पाठानुकूल्येनार्थापनम्<br>२.२ पठितपदानां पर्यायान्वेषणं प्रयोगश्च<br>२.३ अनेकार्थकपदानां प्रयोगप्रदर्शनम्<br>२.४ ज्ञातार्थपदानां पाठस्थविलोमपदानामन्वेषणम्<br>२.५ पठितपदानां योजनेन वाक्यनिर्माणम् |
| ३. अनुच्छेदं पठित्वा प्रश्नोत्तरणम्, तत्सारलेखनञ्च | ३.१ सरलसुबोधवाक्यैर्निर्मितादनुच्छेदाद् बोधप्रश्नानां निर्माणम्<br>३.२ निर्दिष्टानुच्छेदान्निर्मितानां प्रश्नानामुत्तरणम्<br>३.३ निर्दिष्टानुच्छेदस्य सङ्क्षेपीकरणं सारलेखनञ्च<br>३.४ निर्दिष्टानुच्छेदस्य प्रमुखविषयाणां सूत्राङ्कनम् |
| ४. पठितविषयमाधृत्य प्रश्ननिर्माणमुत्तरप्रदानञ्च | ४.१ पठितविषयवस्तुनः प्रश्नोपस्थापनम्<br>४.२ पठितवाक्यस्थपदानां प्रश्नार्थकपदैः प्रतिष्ठापनम्<br>४.३ प्रश्नप्रकृतिमभिज्ञाय तदनुसारेणोत्तरप्रदानम्<br>४.४ पाठसम्बद्धप्रश्नानामुत्तरलेखनम् |
| ५. निर्धारितगद्यपद्यांशयोर्विषयप्रकाशनम् | ५.१ पठितगद्यानां सार-सन्देशलेखनम्<br>५.२ पठितानां पद्यानां गीतानाञ्च भावार्थप्रकाशनम्<br>५.३ पाठगतानां सुभाषितानां भावविशदीकरणम्<br>५.४ पाठगतचरितानां चारित्रिकवैशिष्ट्यविश्लेषणम्<br>५.५ पठितविषयाणां सतर्कं वर्णनम्<br>५.६ पाठगतानां विशिष्टवाक्यानां सप्रसङ्गं व्याख्यानम् |
| ६. निर्दिष्टविषयेषु सर्जनात्मकलेखनम् | ६.१ परिचितविषयाणां लिखितवर्णनम्<br>६.२ सूत्राण्याधृत्य कथालेखनम्<br>६.३ पद्यस्य संवादस्य च स्वशब्दैर्गद्ये रूपान्तरणम्<br>६.४ स्वकीयवैयक्तिकविवरणस्य निर्माणम्<br>६.५ अनुभूतविषयमवलम्ब्यानुच्छेदरचना |
| ७. पठितविषयमनुशील्य मौलिकलेखनम् | ७.१. सेवाया माहात्म्यप्रकटनेनानुच्छेदरचना<br>७.२. काव्यपद्यगतसूक्तीनां सोदाहरणं सार्थकत्वनिरूपणम्<br>७.३. सोदाहरणं पद्यवर्णितनीतीनां व्यवहारोपयोगेन जायमानस्य लाभस्य निरूपणम्<br>७.४. नैतिककथायां वर्णितस्य पक्षस्य व्यावहारिकत्वनिरूपणम्<br>७.५. पौराणिककथायाश्चरितगतवैशिष्ट्यनिरूपणम्<br>७.६.सोदाहरणं नीतिशिक्षाया व्यवहारोपयोगित्वसाधनेन मौलिकलघुप्रबन्धरचनम्<br>७.७. शल्यतन्त्रे आयुर्वेदाचार्याणां योगदानेन प्राचीनशल्यतन्त्रस्य वर्तमानचिकित्सायामवदानवर्णनम्<br>७.८.कृतिवैशिष्ट्यादिकमाधृत्य जीवनवृत्तगतकाव्यस्रष्टुः संस्कृतसाहित्ये योगदानप्रकाशनम्<br>७.९. सामाजिक-सञ्जालानां सदुपयोगस्य लाभनिरूपणम्<br>७.१०. आर्यसंस्कृतेर्ह्रासोत्पन्नहानीनां तत्संरक्षणोपायानां च सूचीनिर्माणम् |
| ८. सरलवाक्यानामनुवादः | ८.१ पठितसंस्कृतवाक्यानां नेपालिभाषायामनुवादः |

| | |
|---|---|
| | ८.२ नेपालिभाषायाः सरलवाक्यानां संस्कृतेऽनुवादः<br>८.३ प्रदत्तस्य पठितानुच्छेदस्य नेपालिभाषायामनुवादः |
| ९. पाठे प्रयुक्तानां भाषातत्त्वानां प्रयोगः | ८.१ पाठगतपदवाक्यानां सन्धिविधानं सन्धिविच्छेदनञ्च<br>८.२ निर्दिष्टानां शब्दानां धातूनाञ्च रूपावल्याः प्रयोगः<br>८.३ पाठप्रयुक्तानामव्ययपदानां वाक्येषु योजनम्<br>८.४ निर्दिष्टप्रत्ययैर्निष्पन्नानां पाठप्रयुक्तानां पदानां प्रकृतिप्रत्ययविच्छेदनं वाक्येषु प्रयोगश्च<br>८.५ पाठे प्रयुक्तानां कारकविभक्तीनां यथानिर्देशं प्रयोगः<br>८.६. प्रदत्तवाक्यानां लिङ्ग-वचन-पुरुषपरिवर्तनेन लेखनम् |

व्याकरणखण्डः

| **शिक्षणोपलब्धयः** | **शिक्षणोपलब्धिविस्तरः** |
|---|---|
| १. वर्णानां स्थान-प्रयत्न-भेदनिर्धारणपुरःसरं व्याकरणस्य पारिभाषिकसंज्ञानामर्थापनम् | १.१ वर्णानां परिचायनम्<br>१.२ पाणिनीयशिक्षानुसारेण वर्णानामुच्चारणम्<br>१.३ चतुर्दशमाहेश्वरसूत्राणां तत्प्रयोजनस्य च निर्वचनम्<br>१.४ प्रत्याहारनिर्मितिप्रकारावबोधस्तत्प्रयोगश्च<br>१.५ वर्णानां भेदनिरूपणम्<br>१.६ वर्णोत्पत्तिप्रक्रियायां शरीरावयवानां भूमिकां निरूप्य वर्णानां स्थाननिर्धारणम्<br>१.७ स्पृष्टादिसंज्ञानुशीलनेन वर्णानां प्रयत्ननिर्धारणम्<br>१.८ वर्णानां पारिभाषिकसंज्ञावबोधः<br>१.९ सूत्र-वार्तिक-परिभाषाणां लक्षणावबोधेन सूत्राणां षड्विधत्वसाधनम्<br>१.१० ससूत्रमित्-लोप-प्रत्याहार-ह्रस्व-दीर्घ-प्लुतोदात्तानुदात्त-स्वरितानुनासिक-सवर्ण-संहिता-संयोग- पदसंज्ञानां परिज्ञानं प्रयोश्च<br>१.११ निर्दिष्टसूत्र-वार्तिक-परिभाषाणामर्थापनेन लक्ष्ये समन्वयप्रकारप्रदर्शनम् |
| २. अव्यवहितोच्चारितत्वेन पदान्तत्वेन वा जायमानं वर्णध्वनिपरिवर्तनं परिचित्य सन्धेर्विधानविच्छेदने, ससूत्रं पञ्चसन्धिप्रक्रियाववोधश्च | २.१ सन्धेः पञ्चविधत्वनिर्वचनम्<br>२.२ सन्धिविधाने संहिताया आवश्यकत्वं प्रतिपादनेन तन्नित्यत्वविवक्षाधीनत्वयोर्निश्चयनम्<br>२.३ स्थान्यादेशयोः परिचायनेन स्थानिनः स्थानार्थगुणप्रमाणैः सदृशतमस्यादेशस्य चयनम्<br>२.४ आदेशागमयोरनुबन्धव्यवस्थायास्तत्फलस्य, तयोः स्थानिना सह सम्बन्धस्य चावबोधेन च तत्स्थापनविधेरनुशीलनम्<br>२.५ ससूत्रं यण्-अयादि-यकारवकारलोप-गुण-वृद्धि-दीर्घ-पररूप-पूर्वरूपावङ्सन्धिनियमानां बोधः प्रयोगश्च<br>२.६ ससूत्रं द्वित्व-जश्त्व-लोप-संयोगान्तलोप-रपरत्वविधीनामनुशीलनम्<br>२.७ प्रकृतिभावस्य प्लुत-प्रगृह्यसंज्ञयोश्च पारिभाषिकार्थावबोधेन |

| | |
|---|---|
| | तत्सम्बन्धनिरूपणम्<br>२.७ सोदाहरणं प्लुत-प्रगृह्यसंज्ञयोः प्रकृतिभावस्य च विधायकानां सूत्रवार्तिकानामर्थानुशीलनं प्रयोगश्च<br>२.८ प्राप्तेऽपि सन्धौ स्वभावेनावतिष्ठतां प्रयोगाणां साधुत्वस्य प्रयोगकौशलस्य च प्रदर्शनम्<br>२.९ श्चुत्व-ष्टुत्व-जश्त्व-चर्त्वानुनासिकानुस्वार-पूर्वसवर्ण-छत्व-परसवर्णसन्धिनियमाननुशील्य सन्धेर्विधानं विच्छेदश्च<br>२.१० ङमुट्-धुट्-तुगनुनासिकानुस्वारागमैः सन्धिप्रक्रियानुशीलनम्<br>२.११ ससूत्रं विसर्गस्य सत्व-षत्व-विसर्गादेशसन्धिनियमनिर्वचनम्<br>२.१२ सोदाहरणं ससूत्रञ्च रुत्वोत्व-सत्व-यत्व-यलोप-रेफादेश-रेफलोपनिमित्तकदीर्घ-सुलोपप्रभृतिस्वादिसन्धिनियमनिर्वचनम्<br>२.१३ निर्दिष्टसूत्र-वार्तिक-परिभाषा-कारिकाणामर्थापनेन प्रयोगसिद्धिप्रक्रियाप्रदर्शनं तत्प्रयोगश्च |
| ३. अजन्तपुंलिङ्गशब्दानां ससूत्रं रूपसिद्धिप्रक्रियान्वाख्यानं रूपावल्याः प्रयोगश्च | ३.१ लिङ्गानां त्रिविधत्वप्रतिपादनेन निर्धारितानां तत्सदृशानाञ्चाजन्तपुंलिङ्गशब्दानां निदर्शनम्<br>३.२ सुबन्तपदानां तत्सम्पादकसुप्प्रत्ययानाञ्च परिचायनम्<br>३.३ प्रातिपदिकसंज्ञासूत्रयोरर्थापनेन व्युत्पन्नाव्युत्पन्नशब्दानां प्रातिपदिकत्वसाधनम्<br>३.४ सुप्प्रत्ययानां विभक्तित्वस्यानुबन्धविनिर्मुक्तस्वरूपाणाम् अजादि-हलादि-भादि-ङित्त्वादिविशेषतानां सर्वनामस्थान-सुडौडाप्संज्ञानाञ्चावबोधेन तत्प्रयुक्तकार्याणामनुशीलनम्<br>३.५ ससूत्रमवसानप्रभृतिनिर्दिष्टसंज्ञाज्ञानं प्रयोगश्च<br>३.६ सर्वनामशब्दानां परिगणनपूर्वकं पूर्वादि-त्यदादिशब्दानाम्, उभोभयशब्दयोः, अन्येषाञ्च सर्वनामशब्दानां रूपावलिगतवैशिष्ट्यप्रकाशनम्<br>३.७ सर्वविभक्तिवचनेषु प्रातिपदिकप्रत्ययोः संयोजनेन निर्दिष्टशब्दानां रूपनिष्पादनम्<br>३.८ अजन्तपुंलिङ्गशब्दानां रूपावलिबोधपूर्वकं वाक्येषु योजनम्<br>३.९ निर्धारितसूत्र-वार्तिक-परिभाषाणामर्थानुशीलनेन प्रयोगसाधनं तत्सिद्धिप्रक्रियागतशङ्कासमाधानञ्च |
| ४. अजन्तस्त्रीलिङ्गशब्दानां स्वरूपावबोधपूर्वकं ससूत्रं रूपसाधनं तत्प्रयोगश्च | ४.१ निर्दिष्टशब्दानां स्वरूपानुशीलनेन तत्सदृशानामजन्तस्त्रीलिङ्गशब्दानां निदर्शनम्<br>४.२ स्त्रीप्रत्ययान्तानामन्येषाञ्च अजन्तस्त्रीलिङ्गशब्दानां प्रातिपदिकत्वसंसाधनं विभक्तियोजनेन रूपाणां निष्पादनञ्च<br>४.३ नदीसंज्ञायास्तत्प्रयुक्तकार्याणाञ्चावबोधः प्रयोगश्च<br>४.४ आबन्तशब्देषु ङितां याट्स्याडागमयोरौङः शीभावस्य टौस्सम्बुद्धिष्वेत्वस्य ङेराम्भावस्य चानुशीलनम्<br>४.५ सर्वनामशब्देषु विशेष्यनिघ्नशब्देषु च समुचितस्त्रीप्रत्यययोजनेन स्त्रियां रूपाणां निष्पादनं प्रयोगश्च<br>४.६ अजन्तस्त्रीलिङ्गशब्दानां रूपावल्याः प्रयोगकौशलप्रदर्शनम्<br>४.७ निर्धारित-सूत्र-वार्तिक-परिभाषाणामर्थापनं लक्ष्ये तत्समन्वयश्च<br>४.८ सूत्रार्थसङ्घटनपूर्वकं प्रयोगसिद्धिप्रकारान्वाख्यानम् |

| | |
|---|---|
| ५. अजन्तनपुंसकलिङ्गशब्दानां सूत्रार्थसङ्घटनपूर्विकायाः रूपसिद्धिप्रक्रियायाः परिज्ञानं तत्प्रयोगश्च | ५.१ निर्धारितानां तत्सदृशानाञ्च अजन्तनपुंसकलिङ्गशब्दानां परिचायनम्<br>५.२ नपुंसकलिङ्गे सर्वनामस्थानस्य पृथक्संज्ञायाः तत्प्रयोजनस्य चान्वाख्यानम्<br>५.३ नपुंसके स्वमोरम्भावस्य लुको वा, औङः शीभावस्य, जश्शसोः शिभावस्य च सार्वत्रिकप्रवृत्तेः, तृतीयादौ च इग्भिन्नप्रातिपदिकानां प्रायेण पुंवत्त्वस्य चानुशीलनेन रूपसाधुत्वप्रक्रियाया वैशिष्ट्यप्रकाशनम्<br>५.४ नपुंसकलिङ्गेऽजन्तप्रातिपदिकानां ह्रस्वविधाननियमानुशीलनम्<br>५.५ इगन्तस्य क्लीबस्याजादौ विभक्तौ नुमागमस्य, आमि नुटा नुम्बाधनस्य च नियमावबोधपूर्वकः प्रयोगः<br>५.६ निर्धारितसूत्र-वार्तिक-परिभाषाणामर्थापनं विधाय लक्ष्ये तत्समन्वयप्रकारनिदर्शनम्<br>५.७ अवस्थानिदर्शन-सूत्रार्थसङ्घटनपूर्वकं निर्दिष्टप्रयोगाणां साधुत्वप्रदर्शनं सिद्धपदानां प्रयोगव्यापारश्च |

न्यायखण्डः

| **शिक्षणोपलब्धयः** | **शिक्षणोपलब्धीनां विस्तरः** |
|---|---|
| १. न्यायवैशेषिकशास्त्रयोः प्रथितानां केषाञ्चन पारिभाषिकशब्दानामर्थपरिचायनम् | १.१ पाठ्यग्रन्थान्तर्गतनिर्दिष्टप्रकरणेषु प्रयुक्तानां पारिभाषिकपदानामर्थनिर्धारणम्<br>१.२ तेषां पदानां वाक्येषु प्रयोगः<br>१.३ तत्तत्पारिभाषिकपदप्रयोगपुरस्सरं पदार्थानां लक्षणनिर्वचनम्<br>१.४ तत्तत्पारिभाषिकपदप्रयोगपुरस्सरं वाक्यार्थबोधनिर्वचनम् |
| २. वैशेषिकशास्त्राभिमत-पदार्थोद्देशनम्, द्रव्यपदार्थपरिचयप्रदानं च | २.१ वैशेषिकदर्शनाभिमतपदार्थोद्देशः<br>२.२ नित्यानित्यद्रव्याणां विभजनम्<br>२.३ पृथिव्यादीनां चतुर्णां द्रव्याणां सभेदनिर्वचनम्<br>२.४ आकाशादीनां नित्यद्रव्याणां विवेचनञ्च |
| ३. शब्दान्तानां गुणानां निरूपणम् | ३.१ रूपादिचतुर्विंशतिगुणानामुद्देशः<br>३.२ रूपादिशब्दान्तगुणानां लक्षणकरणम्<br>३.३ रूपादिशब्दान्तगुणानां लक्षणघटकपदानां प्रयोजनकथनम्<br>३.४ पाकजगुणनिर्वचनम्<br>३.५ द्वित्वादिसङ्ख्योत्पत्तिप्रकारः |
| ४.बुद्धि-बुद्धिभेद-कारण-कारणभेदनिरूपणम् | ४.१ बुद्धेर्लक्षणनिर्वचनं बुद्धिभेदनिरूपणञ्च<br>४.२ स्मृतेरनुभवस्य च सोदाहरणं लक्षणप्रतिपादनं यथार्थायथार्थानुभवयोर्वर्णनञ्च<br>४.३ कारणस्वरूपविवेचनं कारणभेदनिरूपणञ्च<br>४.४ समवाय्यसमवायिनिमित्ततया कारणस्य त्रैविध्यप्रतिपादनम्<br>४.५ सोदाहरणं समवायिकारणलक्षणप्रतिपादनम्<br>४.६ सोदाहरणमसमवायिकारणलक्षणप्रतिपादनम्<br>४.७ निमित्तकारणलक्षणनिरूपणम् |

| | |
|---|---|
| ५. प्रत्यक्षप्रमाणस्य प्रत्यक्षप्रमायाश्चोपपादनम् | ५.१ प्रत्यक्षप्रमाणलक्षणनिर्वचनम्<br>५.२ प्रत्यक्षप्रमालक्षणनिर्वचनम्<br>५.३ प्रत्यक्षप्रमाणभेदनिर्वचनम्<br>५.४ प्रत्यक्षप्रमाकारणीभूतसन्निकर्षभेदनिर्वचनम्<br>५.५ सन्निकर्षविश्लेषणम्<br>५.६ प्रत्यक्षप्रमाणोपसंहारः |

कक्षा १०

भाषाखण्डः

श्रवणं भाषणञ्च

| शिक्षणोपलब्धयः | शिक्षणोपलब्धीनां विस्तरः |
|---|---|
| १. वर्ण-पद-वाक्यानुच्छेदानामनूच्चारणम् | १.१ श्रुतानां वर्णानां शुद्धोच्चारणम्<br>१.२ संस्कृतपदानामनूच्चारणम्<br>१.३ अधीतानधीतानां वाक्यानामनुच्छेदानाञ्चानुवाचनम् |
| २. गद्यांशानां यथाश्रुति वाचनम् | २.१ गद्यांशस्य सस्वरं वाचनम्<br>२.२ पठितस्य गद्यांशस्य यथाविधि भाषणम्<br>२.३ गद्यांशगतपदानां भावप्रकटनेन उच्चारणम् |
| ३. पद्यस्य श्रवणेन यथालयमुच्चारणम् | ३.१ पद्यं श्रुत्वा लयानुशीलनम्<br>३.२ निर्दिष्टपद्यस्य यथालयमुच्चारणम्<br>३.३. गतियत्यादिवशात् पद्यप्रयुक्तच्छन्दोऽभिज्ञानम्<br>३.३ लयं निश्चित्य पद्यगतपदानां वाचनम्<br>३.४ श्रुतस्य पद्यस्य भावाभिव्यञ्जनम् |
| ४. पठितपदानां सार्थं वाक्येषु प्रयोगः | ४.१ पदानां पाठानुकूलमर्थप्रकटनम्<br>४.२ अर्थं श्रुत्वा पाठस्थशब्दानां कथनम्<br>४.३ पदार्थाननुशील्य वाक्यार्थप्रकाशनम्<br>४.४ पठितपदानामर्थानुशीलनेन वाक्येषु योजनम् |
| ५. पठितविषयमाधृत्य प्रश्नोत्तरणम् | ५.१ पठितविषयात् प्रश्ननिर्माणम्<br>५.२ पठितविषयेषु जिज्ञासोद्भावनम्<br>५.३ अधीतविषयाधृतप्रश्नानामुत्तरणम् |
| ६. श्रुतस्य पठितस्य वा विषयस्य सार-भाव-संरचना-क्रमाणां पाठस्थचरितानां परिचायनञ्च | ६.१ पठितस्य श्रुतस्य वा विषयवस्तुनः सारांशभावार्थप्रकाशनम्<br>६.२ पठितविषयवस्तुनो विधागतसंरचनाया अभिव्यञ्जनम्<br>६.३ अधीतविषयवस्तूनां यथाक्रमं प्रस्तुतिः<br>६.४ पाठस्थचरितानां वैशिष्ट्यप्रकाशनम् |
| ७. परिचितविषयेषु स्वाभिमतप्रकटनम् | ७.१ श्रुतस्य दृष्टस्य पठितस्य वा विषयवस्तुनः परिचायनम्<br>७.२ अनुभूतविषयस्य विश्लेषणम्<br>७.३ दृष्टसामाजिकसमस्यायाः समाधानोपायप्रदर्शनम् |
| ८. पाठगतानां भाषातत्वानां परिचायनम् | ८.१ पाठानुप्रयुक्तसन्धीनां नामाङ्कनम्<br>८.२ निर्दिष्टानां शब्दानां धातूनाञ्च रूपावलिकथनम्<br>८.३ पाठप्रयुक्तानामव्ययपदानां सान्दर्भिकार्थप्रकाशनम्<br>८.४ निर्दिष्टप्रत्ययैर्निष्पन्नानां पाठप्रयुक्तानां पदानां |

| | |
|---|---|
| | प्रकृतिप्रत्ययनिर्धारणम्<br>८.५ पाठस्थवाक्येषु प्रयुक्तानां पदानां कारकविभक्तिनिर्देशनम्<br>८.६ पाठप्रयुक्तपदानां वाच्य-काल-भावनिदर्शनम्<br>८.७. श्रुतवाक्यानां वाच्य-काल-भावपरिवर्तनम् |
| ९. पाठगतविषयाणां वर्णनम् | ९.१. स्तुतिपद्यानि श्रुत्वा पद्यवर्णितदेव्या महिमवर्णनम्<br>९.२. निर्दिष्टमेघदूतपद्यश्रवणेन प्रकृतेः सौन्दर्यवर्णनम्<br>९.३. निर्दिष्टगीतापद्यान्याकर्ण्य निष्कामकर्मयोगस्य परिचयप्रकटनम्<br>९.४. ऐतिहासिककथायाः श्रवणेन कथाविषयस्य ऐतिह्यप्रदर्शनम्<br>९.५. लोककथाया आकर्णनेन तस्या लोकप्रचलिताया हेतुकथनम्<br>९.६. जलविषयकं प्रबन्धं श्रुत्वा जलस्य जीवनत्वप्रतिपादनम्<br>९.७. योगप्रबन्धं श्रुत्वा योगसाधनायां प्राणायामस्य महत्त्वाख्यापनम्<br>९.८. जीवनवृत्तं श्रुत्वा कणादजीवनवृत्तस्य प्रेरकपक्षप्रकटनम्<br>९.९. लघुनाटकाकर्णनेन लघुनाटकसन्देशकथनम्<br>९.१०.प्रवचनपाठश्रवणेन आहारसंयमस्य महत्त्वाख्यापनम् |

पठनम्

| **शिक्षणोपलब्धयः** | **शिक्षणोपलब्धीनां विस्तरः** |
|---|---|
| १. लयमनुसृत्य पद्यस्य वाचनम् | १.१ यति-गति-लयनिर्धारणेन पद्यस्य पठनम्<br>१.२ पद्यं पठित्वा यतिनिर्धारणम्<br>१.३ लयबोधपुरःसरं पद्यस्य गायनम्<br>१.४ पठितस्य पद्यस्य भावप्रकाशनम् |
| २. विषयावगमेन निर्धारितगद्यांशस्य पठनम् | २.१ गद्यांशस्य द्रुतपठनम्<br>२.२ गद्यांशस्य मौनपठनं विधाय तद्गतविषयप्रकाशनम्<br>२.३ अधीतस्य गद्यांशस्य सारसन्देशकथनम्<br>२.४ सन्धियुतपदानि परिचित्य निर्धारितगद्यांशस्य पठनम्<br>२.५ लेख्यचिह्नानां पालनेन गद्यांशस्य सस्वरं साभिनयञ्च वाचनम्<br>२.६ पाठ्यांशपठनेन प्रमुखविषयाणां सङ्क्षेपेण प्रस्तुतिः<br>२.७ पाठ्यवस्तुनोऽज्ञातार्थानां पदानां सङ्कलनम् |
| ३. निर्धारितसंवादाध्ययनेन विषयप्रकाशनम् | ३.१ संवादं पठित्वा प्रमुखविषयाणां सूत्ररूपेण निगदनम्<br>३.२ परिवेशं प्रकल्प्य संवादस्य साभिनयं पठनम्<br>३.३. निर्धारितसंवादमधीत्य सन्देशप्रकाशनम् |
| ४. निर्दिष्टविषयवस्त्वाश्रित्य प्रश्नोत्तरणम् | ४.१ पाठस्य विषयमाधृत्य प्रश्ननिर्माणम्<br>४.२ पठितपाठस्थविषयवस्तुनः प्रकटनम्<br>४.३ अधीतविषयवस्तुन उद्धृतप्रश्नानामुत्तरणम्<br>४.४ पाठं पठित्वा सारवाक्यानां भावविस्तरणम् |
| ५. पाठेतरसामग्रीणां पठनेन विषयवस्तूनां प्रकाशनम् | ५.१ पाठेतरा निर्दिष्टसामग्रीरधीत्य तद्गतविषयवर्णनम्<br>५.२ श्रुतस्य दृष्टस्य पठितस्य वा वस्तुनो विषयाभिव्यञ्जनम्<br>५.३ अनुभूतेषु सामयिकविषयेषु स्वाभिमतप्रकटनम् |

| | |
|---|---|
| ६. पाठगतभाषातत्वानामनुशीलनम् | ६.१. संस्कृतभाषाया गद्यपद्ययोः सन्धिविच्छेदपुरःसरं पठनम्<br>६.२. निर्धारितानां धातूनां शब्दानाञ्च रूपावल्यास्तत्प्रयोगेण निर्मितवाक्यानाञ्च पठनम्<br>६.३. निर्दिष्टधातूनां रूपावल्याः पठनेन कालनिर्धारणम्<br>६.४. पाठं पठित्वा निर्दिष्टप्रत्ययैर्निष्पन्नानां पदानां सङ्कलनम्<br>६.५. पाठितपाठाद् निर्दिष्टकारकविभक्त्योरुदाहरणानामन्वेषणम्<br>६.६. पाठस्य मौनपठनेन उपसर्गसहितानां समस्तानाञ्च पदानां सूचीकरणम्<br>६.७. पाठितानामव्ययपदानां पाठानुकूलमर्थनिर्धारणम्<br>६.८. पाठगतवाक्यानां पठनेन वाच्य-काल-भावज्ञाननिगदनम् |
| ७. पाठस्य पठनेन तद्गतविषयाणामभिव्यञ्जनम् | ७.१ स्तुतिपद्यानां पठनेन शक्तिमहिमवर्णनम्<br>७.२ मेघदूतपद्यान्यधीत्य प्रकृतेर्मनोहारित्वनिरूपणम्<br>७.३ गीतापद्यानामध्ययनेन निष्कामकर्मयोगस्य महत्वनिगदनम्<br>७.४ ऐतिहासिककथापठनेन तद्वर्णितविषयाणां प्रामाणिकत्वनिरूपणम्<br>७.५ लोककथाया अध्ययनेन ततो ग्राह्यपक्षनिरूपणम्<br>७.६ जलविषयकप्रबन्धपठनेन जलस्रोतसः संरक्षणस्य लाभनिदर्शनम्<br>७.७ योगप्रबन्धं पठित्वा प्राणायामप्रकारनिरूपणम्<br>७.८ जीवनवृत्तं पठित्वा पौरस्त्यवाङ्मये कणादस्य योगदानाख्यापनम्<br>७.९ लघुनाटकाध्ययनेन नाटकस्य चरित्राणां चारित्रिकवैशिष्ट्यप्रकटनम्<br>७.१०. प्रवचनपाठमधीत्य आहारसंयमस्य स्वास्थ्यरक्षकत्वनिरूपणम्<br>७.११. निर्दिष्टसामग्रीणां पठनेन आत्मगौरवभावप्रकटनम् |

लेखनम्

| **शिक्षणोपलब्धयः** | **शिक्षणोपलब्धीनां विस्तरः** |
|---|---|
| १. पद-वाक्यानुच्छेदानां शुद्धलेखनम् | १.१ पदानां वाक्यानाञ्च श्रुतलेखनम्<br>१.२ पद-वाक्यानुच्छेदानामनुलेखनम्<br>१.३ अशुद्धिनिराकरणपुरःसरं पद-वाक्यानुच्छेदानां पुनर्लेखनम्<br>१.४ पठितपदवाक्ययोः शुद्धलेखनम् |
| २. अर्थानुशीलनेन पठितपदानां वाक्येषु योजनम् | २.१ सन्दर्भं विचार्य पठितपदानामर्थापनम्<br>२.२ वाक्यानुच्छेदस्थानां निर्दिष्टपदानां पर्यायपदैः प्रतिष्ठापनम्<br>२.३ पठितानामनेकार्थकपदानां यथासन्दर्भं प्रयोगकौशलप्रदर्शनम्<br>२.४ विपर्ययपदैर्निर्दिष्टपदानि प्रतिष्ठाप्य विलोमार्थे वाक्यस्य परिवर्तनम्<br>२.५ पठितपदानां योजनेन मौलिकवाक्यनिर्माणम् |
| ३. अनुच्छेदस्य पठनेन प्रश्नोत्तरणम् | ३.१ सरलवाक्यै रचितादनुच्छेदाद् बोधप्रश्नानां निर्माणम्<br>३.२ निर्दिष्टानुच्छेदसम्बद्धप्रश्नानामुत्तरणम् |

| | |
|---|---|
| | ३.३ निर्दिष्टानुच्छेदस्य सारलेखनम्<br>३.४ प्रमुखविषयान् सूत्रीकृत्य निर्दिष्टानुच्छेदस्य सङ्क्षेपीकरणम् |
| ४. पठितविषयमाधृत्य प्रश्नोत्तरणम् | ४.१ पठितविषयेषु प्रश्नोपस्थापनम्<br>४.२ प्रश्नार्थकपदैर्वाक्यस्थपदानां प्रतिष्ठापनेन प्रश्नार्थे वाक्यपरिवर्तनम्<br>४.३ प्रश्नप्रकृतिबोधपूर्वकमुत्तरलेखनम्<br>४.४ पाठसम्बद्धानां प्रश्नानामुत्तरप्रदानम् |
| ५. पाठ्यवस्तुनो विषयप्रकाशनम् | ५.१ पठितगद्यगतविषयाणां सार-सन्देशलेखनम्<br>५.२ पठितस्य पद्यस्य गीतस्य च भावार्थलेखनम्<br>५.३ पाठस्थसुभाषितानां भावप्रकाशनम्<br>५.४ पाठगतचरितानां चारित्र्यविश्लेषणम्<br>५.५ सतर्कं पठितविषयाणामुपस्थापनम्<br>५.६ सन्दर्भप्रसङ्गयोर्निदर्शनेन पाठगतविशिष्टवाक्यानां व्याख्यानम् |
| ६. निर्दिष्टविषयमनुसृत्य सर्जनात्मकलेखनम् | ६.१ अनुभूतविषयाणां मौलिकवर्णनम्<br>६.२ सूत्राधारेण कथाया लघुप्रबन्धस्य च लेखनम्<br>६.३ पद्ये निबद्धविषयस्य गद्यमाध्यमेन विस्तरणम्<br>६.४ लघुनाटककथयोः प्रत्यक्षकथनानामप्रत्यक्षकथनशैल्या लेखनम्<br>६.५ प्रदत्तविवरणाधारेण जीवनवृत्तलेखनम्<br>६.६ परिचितविषयमवलम्ब्य अनुच्छेदरचनम्<br>६.७. स्वानुभूतविषयेषु लघुप्रबन्धरचनाभ्यासः<br>६.८. पठितपद्यानां गद्ये रूपान्तरणम्<br>६.९. कस्यचिद् विषयस्य अध्ययनेन प्रवचनस्य कृते सूत्राणां निर्माणम् |
| ७. पाठगतविषयानुशीनेन मौलिकलेखनम् | ७.१ पौरस्त्ये शक्तिपूजनसंस्कारस्यौचित्यनिरूपणम्<br>७.२. प्रकृतिचित्रणसम्बद्धानां काव्यपद्यान्तराणामन्वेषणेन प्रकृतेः सौन्दर्याख्यापनम्<br>७.३. निष्कामकर्मयोगस्य व्यवहारोपयोगित्वसाधनम्<br>७.४. ऐतिहासिककथायाः सन्देशस्य स्वजीवने सदुपयोगविधिनिरूपणम्<br>७.५. लोकप्रचलितकथाया विषयस्य समाजोपयोगित्वसाधनम्<br>७.६. जलस्रोतसां विनाशेन संसारे आपत्स्यमानानामापदां सूचीकरणं तन्निराकरणोपाय-प्रदर्शनञ्च<br>७.७. जलवायुपरिवर्तनस्य वर्तमानावस्थायाः समीक्षणम्<br>७.८. योगस्याष्टाङ्गेषु प्राणायामस्य स्थाननिर्धारणम्<br>७.९. स्वास्थ्ये प्राणायामस्य लाभनिरूपणम्<br>७.८. पौरस्त्यदर्शनेषु वैशेषिकदर्शनस्य स्थाननिरूपणम्<br>७.९. वैशेषिकदर्शनस्य वैज्ञानिकत्वसाधनम्<br>७.१०. पाठमाधृत्य कणादस्य व्यक्तिवृत्तनिर्माणम्<br>७.११. दर्शनक्षेत्रे कणादस्य स्थाननिर्धारणम्<br>७.१२. वैशेषिकदर्शनस्य सर्वशास्त्रोपकारकत्वसाधनम् |

| | |
|---|---|
| | ७.१३. अभिनेयताया दृष्ट्या नाटकस्य विश्लेषणम्<br>७.१४. लघुनाटकस्य सामजिकतत्त्वप्रकाशनम्<br>७.१५ आहारसंयमस्य स्वास्थ्यरक्षकत्वनिरूपणम्<br>७.१६. हितभोजनस्य मितभोजनस्य चौचित्यनिरूपणम्<br>७.१७. निर्दिष्टविषयाणामनुशीलनेनात्मगौरवस्य राष्ट्रभक्तेश्च भावप्रकाशनम् |
| ८. सरलवाक्यानामनुवादः | ८.१ पठितसंस्कृतवाक्यानां नेपालिभाषायामनुवादः<br>८.२ नेपालिभाषायाः सरलवाक्यानां संस्कृतेऽनुवादः<br>८.३ प्रदत्तयोः पठितगद्यांशपद्यांशयोर्नेपालिभाषायामनुवादः |
| ९. पाठे प्रयुक्तानां भाषातत्त्वानां प्रयोगः | ९.१ पठितसन्धिनियमाननुशील्य संस्कृतभाषया निबद्धेषु गद्यपद्येषु सन्धिविधानं सन्धिच्छेदनञ्च<br>९.२ निर्धारितानां धातूनां शब्दानाञ्च रूपावल्या वाक्येषु प्रयोगः<br>९.३ निर्दिष्टधातूनां रूपावल्या अनुशीलनेन निर्दिष्टकालस्य वाक्यरचना<br>९.४ निर्दिष्टप्रत्ययैर्निष्पन्नानां पाठगतपदानां प्रकृतिप्रत्यययोर्विच्छेदनम्<br>९.५ पाठाधृतकारकनियमाननुशील्य निर्देशानुसारेण वाक्येषु समुचितविभक्तीनां प्रयोगः<br>९.६ पाठप्रयुक्तानां सोपसर्गपदानामुपसर्गनिदर्शनम्<br>९.७ पाठे प्रयुक्तेषु समस्तपदेष्वन्तर्भूतानां पदानां निश्चयनम्<br>९.८ पठितानामव्ययपदानां प्रयोगेण वाक्यनिर्माणम्<br>९.९ वाक्यानां वाच्य-काल-भावपरिवर्तनेन लेखनम् |

**व्याकरणखण्डः**

| **शिक्षणोपलब्धिः** | **शिक्षणोपलब्धिविस्तारः** |
|---|---|
| १. हलन्तशब्दस्वरूपपरिज्ञानेन हान्त-वान्त-रान्त-मान्त-नान्त-जान्तानां निर्धारितपुंलिङ्गशब्दानां ससूत्रं रूपसिद्धिप्रक्रियानिदर्शनं सिद्धपदप्रयोगश्च | १.१ हलन्तशब्दानां स्वरूपाधिगमनम्<br>१.२ भ-पद-सर्वनामस्थानसंज्ञाप्रयुक्तकार्याणां हल्ङ्यादिलोपस्य चानुशीलनेन हलन्तशब्दानां रूपावलिगतवैशिष्ट्यानुशीलनम्<br>१.३ निर्दिष्टसङ्ख्यावाचकशब्दानां लिङ्ग-वचन-रूपावलिगतवैशिष्ट्यपरिचायनपूर्वकः प्रयोगः<br>१.४ निर्दिष्टत्यदादिशब्देषु अदस्पर्यन्तानामत्वपररूपेण किमश्च कादेशेन जायमानं शब्दस्वरूपपरिवर्तनमनुकृत्य विशेषनियमाभावेऽजन्तसर्वनामवत्तेषां रूपावलिनिर्धारणम्<br>१.५ सम्प्रसारणप्रक्रियाया अवबोधः प्रयोगश्च<br>१.६ नान्तशब्देषु सर्वनामस्थाने नुम्विकरणकशब्देषु च सम्बुद्धेः प्रथमैकवचने च जायमानयो रूपयोः सकारणं वैषम्याधिगमनेन प्रयोगः<br>१.७ निर्दिष्टहलन्तपुंलिङ्गशब्दानां तत्सदृशशब्दानाञ्च रूपावल्या बोधः प्रतिपदं वाक्येषु प्रयोगश्च<br>१.८ निर्दिष्टसूत्र-वार्तिक-परिभाषानामर्थानुशीलनेन रूपसाधनं तत्प्रक्रियागतशङ्कानिराकरणञ्च<br>१.९ साधितानां तत्सदृशानाञ्च पदानां यथानिर्देशं प्रयोगेण |

| | |
|---|---|
| | अनुच्छेदादिरचना |
| २. निर्धारितानां दान्त-थान्त-चान्त-तान्त-शान्त-षान्त-सान्तानां पुंलिङ्गशब्दानां सूत्रार्थसङ्घटनपूर्विकाया रूपसिद्धिप्रक्रियाया अनुशीलनेन रूपावल्याः प्रयोगः | २.१ निर्दिष्टसङ्ख्यावाचकशब्दानां लिङ्ग-वचन-रूपावलिगतवैशिष्ट्यपरिचायनपूर्वकः प्रयोगः<br>२.२ निर्धारितानां त्यदादिशब्दनिष्पन्नपदानां सङ्ख्यावाचकपदानाञ्च प्रयोगगतवैशिष्ट्यानुशीलनम्<br>२.३ युष्मदस्मच्छब्दयोः साधुत्वप्रक्रियायाः प्रयोगगतस्य च वैशिष्ट्यप्रकाशनम्<br>२.४ प्रचलितानां हलन्तपुंलिङ्गशब्दानां रूपावल्या बोधः प्रतिपदं वाक्येषु प्रयोगश्च<br>२.५ निर्दिष्टसूत्र-वार्तिकादीनामर्थानुशीलनेन रूपसाधनं तत्प्रक्रियागतशङ्कानिराकरणञ्च<br>२.६ साधितानि तत्सदृशानि च पदानि प्रयुज्य वाक्यानुच्छेदविरचनम् |
| ३. हलन्तस्त्रीलिङ्गशब्दानां ससूत्रं रूपसाधुत्वप्रदर्शनपुरःसरं रूपावल्याः प्रयोगः | २.१ त्यदादिभिन्नहलन्तशब्दानां स्त्रियां पुंसि च रूपावल्या रूपसाधनप्रक्रियायाश्च समत्वाभिज्ञानपूर्वकः प्रयोगः<br>२.२ अत्वपररूपेण कादेशेन वादन्तत्वमापन्नेभ्यस्त्यदादिशब्देभ्यष्टाब्विधानेन आबन्तसर्वनामवत्तेषां व्यवहरणम्<br>२.३ प्रचलितानां हलन्तस्त्रीलिङ्गशब्दानां रूपावलिबोधपूर्वकं वाक्येषु प्रयोगनिदर्शनम्<br>२.४ निर्दिष्टसूत्राणामर्थानुशीलनेन लक्ष्ये तत्समन्वयप्रकारनिदर्शनम्<br>२.५ निर्धारितप्रयोगाणां सूत्रार्थसङ्घटनपूर्वकं साधुत्वप्रकारदर्शनम्<br>२.६ साधितानां तत्सदृशानाञ्च हलन्तस्त्रीलिङ्गशब्दनिष्पन्नपदानां परिचायनं प्रयोगश्च |
| ४. हलन्तनपुंसकलिङ्गशब्दानां सूत्रार्थसङ्घटनेन रूपसाधनं सिद्धपदप्रयोगव्यापारश्च | ३.१ निर्धारितानां तत्सदृशानाञ्च हलन्तनपुंसकशब्दानां परिचायनम्<br>३.२ हलन्तनपुंसके स्वमोर्लुकः, औङः शीभावस्य, जश्शसोः शिभावस्य च सर्वप्रातिपदिकव्यापकप्रवृत्तिमनुशील्य रूपाणां निष्पादनं प्रयोगश्च<br>३.३ हलन्तनपुंसकप्रातिपदिकानां रूपावलिगतस्य साधुत्वप्रक्रियागतस्य च वैशिष्ट्यस्य प्रकाशनम्<br>३.४ लुमति तन्निमित्ताङ्गकार्याभावावबोधपूर्वकं तन्नियामकशास्त्रस्यानित्यत्वप्रतिपादनम्<br>३.५ आदेशबलाद् अदन्ततां प्राप्तानां त्यदादिशब्दानां स्वम्भिन्नविभक्तिषु अदन्तसर्वनामवद्रूपाणां निर्माणं प्रयोगश्च<br>३.६ प्रसिद्धानां हलन्तनपुंसकप्रातिपदिकानां रूपावलिबोधेन पदप्रयोगकौशलप्रदर्शनम्<br>२.७ निर्धारितसूत्र-वार्तिकाणामर्थापनं लक्ष्ये तत्समन्वयप्रकारावबोधश्च<br>२.८ निर्धारितप्रयोगाणां सूत्रार्थसङ्घटनपूर्वकं साधनप्रकारप्रदर्शनम्<br>२.९ निर्दिष्टप्रातिपदिकजानां रूपाणां प्रयोगेण वाक्यानुच्छेदरचना |
| ५. निर्दिष्टानामव्ययशब्दानामर्थानुशीलन | ४.१ अव्ययशब्दानां स्वरूपनिर्वचनपुरःसरमर्थप्रकाशनम्<br>४.२ अव्ययलक्षणस्य सपरिगणनं स्वराद्यव्ययभेदानाञ्च निदर्शनम् |

| | |
|---|---|
| पूर्वकं ससूत्रं पदत्वसाधनं प्रयोगश्च | ४.३ अव्ययसंज्ञकानां निर्दिष्टसूत्राणां सोदाहरणमर्थानुशीलनम्<br>४.४ अव्ययस्यालिङ्गत्वं प्रतिपाद्य तस्माद्विहितस्य सुपो लुग्विधायके शास्त्रे आब्ग्रहणस्य व्यर्थत्वप्रतिपादनम्<br>४.५ अव्ययात्सुपो लुग्विधायकसूत्रस्यार्थमनुशील्य सर्वलिङ्गविभक्तिवचनेषु रूपाणां सदृशत्वप्रदर्शनम्<br>४.६ निर्धारितानामव्ययशब्दानां ससूत्रं पदत्वसाधनम्<br>४.७ अव्ययपदानामर्थानुकूलप्रयोगेण वाक्यानुच्छेदादिरचना<br>४.८ दृष्टगद्यपद्ययोः प्रयुक्तानां निर्दिष्टानेकार्थकाव्ययपदानां सन्दर्भगतार्थान्वेषणमर्थान्तरे प्रयोगनिदर्शनञ्च<br>४.९ निर्दिष्टकारिकायाः सोदाहरणमर्थापनं प्रयोगश्च |

**न्यायखण्डः**

| शिक्षणोपलब्धयः | शिक्षणोपलब्धीनां विस्तरः |
|---|---|
| १. न्यायवैशेषिकशास्त्रयोः प्रथितानां केषाञ्चन पारिभाषिकशब्दानामर्थपरिचयप्रदानम् | १.१ पाठ्यग्रन्थान्तर्गतनिर्दिष्टप्रकरणेषु प्रयुक्तानां पारिभाषिकपदानामर्थनिधारणम्<br>१.२ तेषां वाक्येषु प्रयोगः<br>१.३ तत्तत्पारिभाषिकपदप्रयोगपुरस्सरं पदार्थानां लक्षणनिर्वचनम्<br>१.४ तत्तत्पारिभाषिकपदप्रयोगपुरस्सरं वाक्यार्थबोधनिर्वचनम् |
| २.अनुमानप्रमाणस्य अनुमितिप्रमितेश्च प्रतिपादनम् | २.१ अनुमानस्वरूपाभिव्यक्तिः<br>२.२ अनुमितिस्वरूपनिरूपणम्<br>२.३ परामर्शस्वरूपकथनम्<br>२.४ व्याप्तिस्वरूपविचारः<br>२.५ पक्षधर्मतास्वरूपकथनम्<br>२.६ स्वार्थानुमाननिर्वचनम्<br>२.७ परार्थानुमाननिर्वचनम्<br>२.८ पञ्चावयववाक्यनिरूपणम्<br>२.९ त्रिविधलिङ्गस्वरूपप्रतिपादनम्<br>२.१० सपक्षविपक्षस्वरूपकथनम् |
| ३. हेत्वाभासनिरूपणम् | ३.१ हेत्वाभासनिरूपणप्रयोजननिर्वचनम्<br>३.२ हेत्वाभासलक्षणनिरूपणम्<br>३.३ हेत्वाभासभेदनिर्वचनम्<br>३.४ सोदाहरणसव्यभिचारस्वरूपप्रतिपादनम्<br>३.५ उदाहरणसहितविरुद्धहेत्वाभासस्य स्वरूपनिर्वचनम्<br>३.६ उदाहरणप्रदर्शनपूर्वकं सत्प्रतिपक्षस्वरूपनिरूपणम्<br>३.७ भेदप्रदर्शनपूर्वकासिद्धहेत्वाभासनिर्वचनम्<br>३.८ उदाहरणसहितबाधितहेत्वाभासनिरूपणम् |
| ४.उपमानप्रमाणस्य शब्दप्रमाणस्य च प्रतिपादनम् | ४.१ सोदाहरणमुपमानप्रमाणकथनम्<br>४.२ उपमितिप्रमायाः प्रकारनिर्वचनम्<br>४.३ शब्दप्रमाणाभिव्यक्तिः<br>४.४ शक्तिलक्षणाख्यवृत्तिनिरूपणम्<br>४.५ शाब्दबोधकारणनिर्धारणम् |

| | |
|---|---|
| | ४.६ शाब्दस्वरूपनिरूपणम्<br>४.७ शब्दप्रमाणभेदप्रतिपादनम |
| ५.अयथार्थानुभवस्य, सुखादिगुणानाम्, कर्मादिपदार्थानां च लक्षणनिरूपणम् | ५.१ संशयविपर्ययतर्काणां स्वरूपपरिचयः<br>५.२ स्मृतिनिरूपणम्<br>५.३ सुखदुःखयोस्वरूपाभिव्यक्तिः<br>५.४ शेषात्मगुणनिरूपणम्<br>५.५ सभेदसंस्कारनिर्वचनम्<br>५.६ सामान्यलक्षणकरणम्<br>५.७ विशेषनिरूपणम्<br>५.८ समवायप्रतिपादनम्<br>५.९सभेदाभाववर्णनम्,<br>५.१०सर्वपदार्थानां सप्तस्वन्तर्भावकथनम् |

## ४. विषयवस्तूनां क्षेत्रक्रमौ

**कक्षा-९**

**भाषाखण्डः**

| क्र.सं | विषयः | प्रकरणम् | पाठ्यांशविवरणम् | बोधः | अभिव्यक्तिः | पाठ्यविषयानुशीलनम् | का.घ. |
|---|---|---|---|---|---|---|---|
| १ | पद्यम् | (क) नीतिपद्यम्<br>(ख) महाकाव्यांशः<br>(ग) आचारपद्यम् | (क) चाणक्यनीतेः व्यवहारनीति-सम्बद्धानि पञ्च पद्यानि<br>(ख) किरातार्जुनीय-महाकाव्यस्य प्रथमसर्गस्य सूक्तिप्रधानानि पञ्च पद्यानि<br>(ग) महाभारतान्तर्गतानि आचारसम्बद्धानि पञ्चपद्यानि | पद्यस्य लयबोधः<br>पद्यप्रयुक्तच्छन्दोबोधः<br>पद्यगतपदानामर्थबोधः<br>पद्यस्य वाक्यार्थबोधः<br>भारवेः सामान्यपरिचयबोधः<br>पद्यगतसूक्तीनां तात्पर्यबोधः<br>चाणक्यस्य सामान्यपरिचयबोधः<br>नीतिपद्यवर्णितव्यवहारनीतिबोधः | पद्यानां सलयं वाचनम्<br>पद्यप्रयुक्तच्छन्दोलक्षणाभिव्यञ्जनम्<br>पद्यानामन्वयकरणम्<br>पद्यानां भावार्थप्रकाशनम्<br>पद्यगतपदानां व्युत्पत्तिप्रदर्शनेनार्थकरणम्<br>पद्यगतसूक्तीनामाशयप्रकटनम्<br>नीतिपद्यवर्णितनीतीनां व्यावहारिकत्वप्रतिपादनम् | पद्यप्रयुक्तच्छन्दस उदाहरणान्तरान्वेषणं तत्समन्वयप्रदर्शनम्<br>पद्यानां तात्पर्यानुशीलनम्<br>पद्यानां गद्ये रूपान्तरणम्<br>पद्यगतसूक्तीनां सोदाहरणं सार्थकत्वनिरूपणम्<br>सोदाहरणं नीतिपद्यवर्णितनीतीनां व्यवहारोपयोगेन जायमानस्य लाभस्य निरूपणम् | ९ |
| २ | गद्यम् | कथा | (क) नैतिकी<br>(ख) पौराणिकी | कथाया विषयवस्तुबोधः,<br>कथासन्देशबोधः,<br>कथावस्तुनः स्रोतोबोधः,<br>कथाया आदर्शपक्षबोधः<br>कथायाः शिक्षाबोधः | संक्षेपेण कथाकथनम्,<br>कथायाः सन्देशप्रकटनम्,<br>कथायाः चरित्राणां चरितोद्घाटनम्,<br>कथायाः परिवेशविमर्शनम्,<br>नैतिककथायां वर्णितस्य नीतिविषयस्य विश्लेषणम्,<br>पौराणिककथायाः ग्राह्यपक्षनिरूपणम्,<br>कथागतविषयात् प्रश्ननिर्माणमुत्तर-लेखनञ्च । | कथायां प्रयुक्तानां व्यावहारिकपद-वाक्यानामन्वेषणम्,<br>तत्वानां सन्देशस्य च दृष्ट्या कथाया विश्लेषणम्,<br>नैतिककथायां वर्णितस्य पक्षस्य व्यावहारिकत्वनिरूपणम्<br>पौराणिककथायाः चरितगतवैशिष्ट्यानामादर्शमयत्वनिरूपणम्<br>कथासूत्राण्याधृत्य लघुकथाविरचनम्,<br>मनोहारितया कथायाः कथनम् । | ९ |
| ३ | गद्यम् | प्रबन्धः | क) शल्यतन्त्रविषयकः | प्रबन्धवर्णितविषय-बोधः, | प्रबन्धस्य विषयवस्तुन | गद्यप्रकारदृष्ट्या प्रबन्धसमीक्षणम्, | १० |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| | | | | प्रबन्धरचनाशैली-बोधः, प्रबन्धस्य निष्कर्षबोधः, प्रबन्धस्य सारांशावबोधः, शल्यतन्त्रस्य परिचयबोधः, शल्यतन्त्रस्य महत्त्वबोधः | उपयोगित्वप्रकाशनम्, प्रबन्धस्य निष्कर्षप्रकटनम्, प्रबन्धस्य रचनाशैलीविमर्शनम्, प्रबन्धस्य विषयवस्तुविन्यास-क्रमकथनम्, प्राचीनशल्यतन्त्रस्य महत्त्वकथनम्, शल्यतन्त्रे आचार्याणां योगदाननिरूपणम्, प्रबन्धवर्णितविषयात् प्रश्ननिर्माणमुत्तर-लेखनञ्च । | प्रबन्धवर्णितविषयस्य प्रभावनिरूपणम्, प्रबन्धस्य संयोजनशिल्पनिदर्शनम्, प्रबन्धस्य विषयसङ्गति-निर्देशनम्, आधुनिकशल्यचिकित्साप्रणाल्यां शल्यतन्त्रस्यावदानप्रदर्शनम्, स्वानुभूतविषयेषु प्रबन्धरचनाभ्यासः । | |
| ४. | गद्यम् | जीवनवृत्तम् | संस्कृतकाव्यस्रष्टृषु कस्यचन | काव्यस्रष्टुर्देश-कालकृत्यादिबोधः, काव्यस्रष्टुः साहित्यिकयोगदान-बोधः, तत्काव्यगतवैशिष्ट्यबोधः, काव्यस्रष्टुर्जीवन-वृत्तस्य सामाजिक-प्रभावबोधः | जीवनवृत्तस्य प्रमुखपक्षप्रकाशनम्, काव्यस्रष्टुः काव्यगतवैशिष्ट्य-वर्णनम्, तज्जीवनवृत्तस्य प्रेरकपक्षप्रकटनम्, पाठमाधृत्य काव्यस्रष्टुर्व्यक्तिवृत्त-निर्माणम् जीवनवृत्तमाधृत्य प्रश्ननिर्माणमुत्तर-लेखनञ्च । | साहित्यक्षेत्रे तत्काव्यस्रष्टुः स्थानाकलनम्, सूत्राण्याधृत्य कस्यचिदन्यस्य काव्यस्रष्टुर्जीवन-वृत्तलेखनम्, स्वजीवनस्य प्रमुखघटनानां सूत्रीकरणम् । | ५ |
| ५. | गद्यम् | संवादः | सामाजिकसञ्जालस्योपयोग-विषयकः | संवादगतवाक्यानामर्थबोधः संवादविषयवस्तुबोधः, संवादस्य सन्देशबोधः, सामाजिकसञ्जालस्य सदुपयोगविधिबोधः, सामाजिकसञ्जालस्य प्रयोगसीमबोधः, | संवादस्य सरलार्थप्रकाशनम्, संवादस्य तात्पर्यानुशीलनम्, संवादस्य परिवेशाकलनम् संवादस्य अभिनयनम्, सामाजिकसञ्जालस्य अधिकप्रयोगस्य हानिनिदर्शनम् संवादात् प्रश्ननिर्माणमुत्तर-लेखनञ्च । | संवादस्य अभिनेयत्वनिरूपणम्, संवादे प्रयुक्तानां व्यावहारिकाणां पदवाक्यानां गवेषणम्, संवादे प्रयुक्तानामव्यय-पदानामौचित्य-विमर्शनम्, संवादस्य सामजिकतत्त्व-प्रकाशनम् संवादमाधृत्य सामाजिक-सञ्जालानां सदुपयोगविध्यनुशीलनम् | ५ |
| ६. | गद्यम् | वक्तृता | आर्यसंस्कृतेर्वैज्ञानिकत्व-विषयकः | वक्तृतायाः स्वरूपबोधः, | सामयिकविषयेषु वक्तृताप्रकटनम्, | सामयिकविषयेषु | ५ |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| | | | | वक्तृत्वप्रदर्शने विचारणीयविषयबोधः, पाठगतवाक्यानामर्थबोधः, आर्यसंस्कृतेः परिचयबोधः, आर्यसंस्कृतेः महत्त्वबोधः । | प्रदत्तविषयेषु वक्तृतानुच्छेदनिर्माणम्, आर्यसंस्कृतेर्महत्त्वाख्यापनम्, पाठमाधृत्य प्रश्ननिर्माणमुत्तर-लेखनञ्च । | वक्तृत्वप्रतियोगितााया: आयोजनम्, प्रदत्ते कस्मिँश्चिद् विषये सतर्कं स्वमतोपस्थापनम्, आर्यसंस्कृतेः हानस्य हानीनां तत्संरक्षणोपायानां च सूचीनिर्माणम्, आर्यसंस्कृतेर्वैज्ञानिकत्वप्रतिपादनम् | |
| ७. | काव्य-शास्त्रम् | छन्दः | पद्यलक्षणम्, जाति-वृत्ताख्ययोः पद्यभेदयोः परिचयः, सम-अर्धसम-विषमाख्यानां वृत्तभेदानां परिचयः, ह्रस्वदीर्घवर्णाभिज्ञानम्, लघुगुरुपरिचयः, ह्रस्वानां गुरुभावावस्था, सभेदं गणपरिचयः, यतिपरिचयश्च । अनुष्टुप्, आर्या, इन्द्रवज्रा, उपेन्द्रवज्रा, उपजातिः, इन्दिरा, वंशस्थम्, भुजङ्गप्रयातम्, तोटकम्, स्रग्विणी, द्रुतविलम्बितम् इत्येतेषां छन्दसां ससमन्वयं लक्षणोदाहरणानि । | पद्यलक्षणबोधः, वार्णिकमात्रिक-वृत्तयोः पार्थक्यबोधः, वृत्तभेदबोधः, ह्रस्व-दीर्घ-लघु-गुरु-वर्णबोधः, गणपरिचयबोधः निर्दिष्टच्छन्दसां लक्षणोदाहरणबोधः, अधीतच्छन्दसां पद्यानां लक्ष्यलक्षण-समन्वयबोधः । | पद्यस्वरूपकथनम्, वार्णिकमात्रिक-वृत्तयोः पार्थक्य-विमर्शनम्, समादिवृत्तस्वरूप-कथनम्, पद्यादिषु वर्तमानानामक्षराणां लघुगुर्वाद्यभि-व्यञ्जनम्, निर्दिष्टच्छन्दसां ससमन्वयं लक्षणोदाहरण-कथनम् । | समानाक्षरयुतानां वृत्तानां वर्गीकरणम्, अधीतलक्षणानां वृत्तानामुदाहरणान्तरान्वेषणम्, पद्यावलोकनेन जातिवृत्तयोः समादिवृत्त-भेदानाञ्च प्रदर्शनम्, अधीतच्छन्दसां पद्यानि दृष्ट्वा छन्दोनिरूपणम्, अधीतच्छन्दःसु मौलिकपद्य-रचनाभ्यासः । | ५ |
| सैद्धान्तिकाभ्यासः | | | | | | | ४८ |
| प्रयोगात्मकाभ्यासः | | | | | | | १६ |
| योगः | | | | | | | ६४ |

द्रष्टव्यः कार्यमूलकव्याकरणस्यावधारणायाः अवलम्बनं कृत्वा कारकविभक्तीनां प्रयोगः, लिङ्ग-वचन-पुरुषाणां प्रयोगश्च कर्तव्यः ।

**व्याकरणखण्डः (कवर्गे नव्यव्याकरणेतरविषयमवलम्ब्य अधीयानानां छात्राणां कृते)**

| क्र. सं. | प्रकरणानि | विषयक्षेत्रम् | बोधः | अभिव्यक्तिः | कार्य-घण्टाः |
|---|---|---|---|---|---|
| १. | पारिभाषिक्यः संज्ञाः परिभाषाश्च | ● **मङ्गलाचरणम्**<br>नत्वा वरदराजेति<br>● **संस्कृतव्याकरणस्य परिचयः**<br>● **माहेश्वरसूत्राणि**<br>णकारानुबन्धस्य हकारस्य च वारद्वयं पाठस्य प्रयोजनानि,<br>प्रत्यहारसिद्धिप्रक्रिया, अन्योन्याश्रयदोषः, इतां प्रत्याहारेषु ग्रहणाभावे हेतुः<br>● **उपदेशपदार्थाः**<br>● **वर्णज्ञानम्**<br>वर्णभेदाः, वर्णोत्पत्तिक्रमः, वर्णगतमात्रा, वर्णानां पारिभाषिकसंज्ञाः, वर्णोच्चारणस्थानप्रयत्नाः तत्प्रयोजनञ्च,<br>● अण उदितश्च स्वसवर्णिनां संज्ञात्वनिर्धारणम्<br>● अणस्तपरत्वे तात्कालिकसवर्णिनामेव बोधकत्वनिश्चयनम्<br>● इत्-लोप-प्रत्याहार-ह्रस्व-दीर्घ-प्लुतोदात्तानुदात्त-स्वरितानुनासिक-सवर्ण-संहिता-संयोग-पदसंज्ञानां लोपस्य च परिज्ञानं प्रयोश्च<br>● **ऋलृवर्णयोः मिथः सावर्ण्यं वाच्यमि**ति वार्तिकम् | मङ्गलार्थस्तत्प्रयोजनञ्च<br>पाणिनीयव्याकरणस्य प्रमुखग्रन्थानां सूत्र-वार्तिक-भाष्यकाराणां कौमुदीकारयोश्च नामानि,<br>वर्णसमाम्नाये वर्णक्रमो हकारद्विरुक्तिप्रयोजनञ्च<br>प्रत्यहारनिर्मितिप्रकारः, चतुर्दशसूत्रेषु अनुबन्धानां प्रयोजनम्,<br>वर्णोत्पत्तेः प्रक्रिया क्रमश्च,<br>वर्णानां स्वर-व्यञ्जनभेदौ,<br>स्वराणामुदात्तादिभेदाः, व्यञ्जनानां स्पर्शादिभेदाः, अनुनासिकाननुनासिकवर्णाः,<br>वर्णानां स्थानप्रयत्नानां सङ्ख्या नामानि प्रयोजनञ्च,<br>अण उदितश्च सवर्णिनां बोधकत्वम्<br>सूत्रार्थनिर्धारणेऽनुवृत्त्यध्याहारव्यवस्था,<br>स्थानवैषम्येऽपि ऋलृवर्णयोर्मिथः सावर्ण्यम् | मङ्गलपद्यस्य अन्वयस्य प्रतिपदं पर्यायस्य सरलार्थस्य च प्रकाशनम्<br>चतुर्दशसूत्रेषु वर्णक्रमनिर्वचनम्,<br>माहेश्वरसूत्राणामनुबन्धेन सहितं रहितञ्चोच्चारणम्<br>ससूत्रं प्रत्याहारसिद्धिप्रक्रियाया निगदनम्<br>अणादिचतुश्चत्वारिंशत्संज्ञानां तत्समागतवर्णानाञ्च कथनम्<br>वर्णोत्पत्तेः प्रक्रियाया क्रमस्य च कथनम्<br>वर्णानां भेदनिर्वचनम्<br>वर्णानां स्थानप्रयत्ननिर्धारणम्<br>पारिभाषिकसंज्ञानां ससूत्रं अर्थनिगदनम्<br>निर्दिष्टसूत्र-वार्तिक-कारिकाणामर्थकथनम् | ८ |

| | | | | | |
|---|---|---|---|---|---|
| | | मध्यसिद्धान्तकौमुद्याः संज्ञाप्रकरणस्था विषयाः | | | |
| २. | सन्धिः | ● **अच्सन्धिः**<br>सन्धिपरिचयः, सन्धिभेदाः, यण्-अयादि-गुण-वृद्धि-दीर्घ-पररूप-पूर्वरूपसन्धयः,<br>द्वित्व-जश्व-लोप-अवङ्, संयोगान्तलोप-रपरविधयः,<br>गुण-वृद्धि-धातूपसर्ग-निपात-लघु-गुरुसंज्ञाः,<br>मध्यसिद्धान्तकौमुदीस्थसूत्र-वार्तिक-परिभाषाणामर्थापनम्,<br>प्रयोगसिद्धिप्रक्रिया, अच्सन्धियुतप्रयोगघटितानि वाक्यानि, शङ्कोपशङ्कासमाधानञ्च<br>● **प्रकृतिभावः**<br>प्रकृतिभावपदार्थः,<br>प्रगृह्यसंज्ञा,<br>ह्रस्वसमुचितप्रकृतिभावसन्धिः,<br>प्लुतस्य प्रगृह्यसंज्ञायाः प्रकृतिभावस्य च विधायकानि सूत्रणि,<br>सूत्र-वार्तिकार्थसमन्वयेन प्रयोगसिद्धिः,<br>साधुप्रयोगघटिनवाक्यानि च<br>● **हल्सन्धिः**<br>श्चुत्व-ष्टुत्व-जश्त्व-चर्त्वानुनासिक-पूर्वसवर्ण-छत्वानुस्वार-परसवर्णसन्धयः,<br>आम्रेडितसंज्ञा,<br>सागमपरिचयं धुट्-तुक्-ङमुड्-कुक्-टुग्विधयः, | सभेदं सन्धेरर्थः स्वरूपञ्च, संहिताया महत्त्वम्, वर्णयोर्व्यवहितत्वेनाव्यवहितत्वेन चोच्चारणस्य सन्धिना सह सम्बन्धः,<br>सन्धेर्नित्यत्वस्य विवक्षाधीनत्वस्य चावस्थाः, एकादेशसन्धेवैशिष्ट्यम्,<br>विधिसूत्रस्थानां षष्ठ्यन्त-सप्तम्यन्त-पञ्चम्यन्त-प्रथमान्तपदानामर्थगतवैशिष्ट्यं स्थान्यादेशागमैः सह तत्सम्बन्धश्च,<br>विधिसूत्रस्थपारिभाषिकसंज्ञार्थः,<br>सूत्रार्थसम्पादनविधिः सूत्रार्थस्य लक्ष्ये समन्वयप्रकारश्च,<br>लक्षणानुकूलोदाहरणान्वेषणम्,<br>स्थान्यादेशयोः स्थान्यागमयोश्च सम्बन्धः,<br>स्थानिनः स्थानार्थगुणप्रमाणैरादेशस्य सादृश्यपरीक्षा, स्थानिना सदृशतमस्यादेशस्य चयनम्,<br>विच्छिन्नावस्थासु सूत्राणां प्रवृत्तित्वाप्रवृत्तित्वविवेकः, शास्त्राणां बाध्यबाधकाभावनिश्चयेन उदाहरणेषु समुचितविधेः प्रयोगः, पञ्चसन्धिप्रक्रिया,<br>सूत्र-वार्तिक-परिभाषा-फक्किकार्थः,<br>सूत्रार्थसङ्घटनेन प्रयोगसिद्धिप्रकारः, | सोदाहरणं सन्धिभेदकथनम्<br>विच्छिन्नावस्थासु प्रवर्तमानसन्धिनियमनिर्वचनम्<br>उदाहरणेषु सन्धिविधायकसूत्रकथनम्<br>स्थानिनः सदृशतमादेशान्वेषणम्<br>स्थान्यादेशयोः शत्रुवत्त्वस्य स्थान्यागमयोश्च मित्रवत्त्वस्य सोदाहरणं परिचायनम्<br>आदेशागमयोः स्थापनव्यवस्थायाः ससूत्रं प्रकाशनम्<br>सूत्रार्थसमन्वयाय समुचितोदाहरणान्वेषणम्<br>सन्धिगतपदानां सन्धिविच्छेदनम्<br>विच्छिन्नावस्थासु सन्धिविधानम्<br>सन्धेर्नाम्नः तद्विधायकसूत्रस्य च भाषणम्<br>सूत्र-वार्तिक-परिभाषाणामर्थप्रकाशनम्<br>सूत्रार्थसमन्वयेन प्रयोगसिद्धिप्रकारलेखनम्<br>प्रकृतिभावपदस्य सोदाहरणं पारिभाषिकार्थनिगदनम् | १० |

| | | | | | |
|---|---|---|---|---|---|
| | | मस्य मयवलनविधयः, द्वितीयवर्णादेशविधिः, रुविधिः, रोरनुनासिकानुस्वारागमविधी, सत्वविधिः, जिह्वामूलीयोपध्मानीयविधी च मध्यसिद्धान्तकौमुदीस्थसूत्र-वार्तिक-परिभाषार्थापनेन प्रयोगसिद्धिः, सिद्धप्रयोगनिर्मितानि वाक्यानि च<br>● **विसर्गसन्धिः**<br>विसर्गस्य सत्व-विसर्गादेशसन्धी, सूत्रवार्तिकार्थसमन्वयेन प्रयोगसिद्धिः, सिद्धपदप्रयोगश्च<br>● **स्वादिसन्धिः**<br>रुत्वोत्व-यत्व-विसर्गलोप-रेफादेश-रेफलोपनिमित्तकदीर्घ-सुलोपसन्धयः, सार्थं मध्यसिद्धान्तकौमुदीस्थसूत्र-वार्तिकाः, सूत्रार्थसङ्घटनेन प्रयोगसिद्धिः, सिद्धप्रयोगैर्वाक्यानि च मध्यसिद्धान्तकौमुद्या अच्सन्धितः स्वादिसन्धिप्रकरणान्ता विषयाः । | सन्धियुतस्य विच्छेदो विच्छिन्नस्य सन्धिविधानञ्च, प्रकृतिभावपदार्थः, प्लुत-प्रगृह्यसंज्ञा तत्प्रयुक्तकार्यञ्च, प्रकृतिभावप्रक्रिया, सन्धियुतपदानां वाक्येषु प्रयोगप्रकारः, वाक्यानुच्छेदेषु अनुस्वारस्य विसर्गस्य जिह्वामूलीयस्योपध्मानीयस्य च सन्धिनियमानुकूलः प्रयोगः | विसर्गसन्धिनियमानां सोदाहरणं सारिण्यां प्रदर्शनम्<br>अनुस्वार-परसवर्णनियमानां ससूत्रं सोदाहरणञ्च सूचीनिर्माणम्<br>एकादेशसन्धीनां सोदाहरणं वैशिष्ट्यनिगदनम्<br>प्लुत-प्रगृह्यसंज्ञयोः प्रकृतिभावस्य च विधायकानां सूत्राणां सोदाहरणमर्थापनम्<br>अनेकशास्त्रप्रवृत्तिस्थलेषु शास्त्राणां सिद्धत्वासिद्धत्वयोः पूर्वत्वापरत्वयोः अवकाशत्वानवकाशत्वयोश्च विवेकेन समुचितशास्त्रप्रयोगस्य कौशलप्रदर्शनम्<br>सन्धियुक्तप्रयोगाणां वाक्येषु योजनम्<br>निर्देशानुसारेण सन्धेर्विधानं विच्छेदनञ्च | |
| ३. | अजन्तपुंलिङ्गम् | ● **सुबन्तपरिचयः**<br>पदपरिचयः, सुबन्ततिङन्तपदभेदौ सुबन्तपदपरिचयश्च, व्युत्पन्नाव्युत्पन्नशब्दपरिचयः, लिङ्गानां त्रिविधत्वञ्च<br>● **प्रतिपदिकसंज्ञा**<br>सूत्रयोरर्थः, | शब्द-पदयोः पार्थक्यम्, अपदस्याप्रयोगः, शब्दानां व्युत्पन्नाव्युत्पन्नत्वेऽजन्तत्वहलन्तत्वे च, लिङ्गानां त्रैविध्यम्, शब्दानां प्रातिपदिकसंज्ञा, धातूनां प्रत्ययानां | प्रचलितशब्दानां व्युत्पन्नाव्युत्पन्नत्वनिर्धारणम्<br>शब्दपदयोः पार्थक्यकथनम्<br>शब्दानामजन्तत्वहलन्तत्वनिश्चयनम्<br>अजन्तशब्दानामन्त्यवर्णाधारेण | १० |

| | | | | | |
|---|---|---|---|---|---|
| | | व्युत्पन्नाव्युत्पन्नशब्दानां प्रातिपदिकत्वसाधनम्, अर्थवच्छब्दस्वरूपेषु धातु-प्रत्ययानां कृत्तद्धितभिन्नप्रत्ययान्तानाञ्च प्रातिपदिकत्वाभावनिरूपणम्, प्रातिपदिकसंज्ञाप्रयोजनञ्च<br>● **विभक्तिपरिचयः**<br>ससूत्रं सुप्प्रत्ययपरिचयः, सुपां परिगणम्, विभक्तिसंज्ञासूत्रम्, विभक्तेः सुप्तिङौ भेदौ, सुप्सु अनुबन्धानां प्रयोजनानि अनुबन्धविनिर्मुक्तस्वरूपाणि च, सुप्सु अजादि-हलादि-भादि-ङित्-औङ्-सुट्-आप्प्रभृतिविशेषसंज्ञाः तत्प्रयोजानि च, सुप्सु विभक्ति-वचन-पुरुष-सम्बुद्धि-सर्वनामस्थानसंज्ञाश्च<br>● **सुबुत्पत्तिः**<br>प्रातिपदिक-विभक्तिसम्बन्धः, सुबुत्पत्तेः प्रक्रिया, **ङ्याप्प्रातिपदिकादि**ति सूत्रे ङ्याब्ग्रहणस्य प्रयोजनम्, अङ्गसंज्ञा, विकरणविशिष्टस्यापि अङ्गसंज्ञासम्पादनम्,<br>● **स्थानिवद्भावव्यवस्था**<br>● **सन्निपातपरिभाषा**<br>● **सर्वनामसंज्ञा**<br>सर्वादिगणपरिचयः<br>सर्वनामसंज्ञकसूत्रम्,<br>सर्वाद्यन्तस्यापि सर्वनामसंज्ञाविधानम्, | कृत्तद्धितभिन्नप्रत्ययान्तशब्दानां प्रातिपदिकत्वाभावः, सुप्प्रत्ययाः, सुपामनुबन्धास्तत्प्रयोजनञ्च, सुपामजादि-हलादि-भादि-ङिदौङ्-सुडाप्प्रभृतिविशेषसंज्ञाः तत्प्रयोजानि च, सुप्सु विभक्ति-वचन-पुरुष-सम्बुद्धि-सर्वनामस्थानसंज्ञास्तत्प्रयुक्तकार्याणि च, प्रातिपदिक-विभक्तिसम्बन्धः, प्रातिपदिकात् सुबुत्पत्तिः, प्रातिपदिक-विभक्त्योर्योजनेन पदनिर्माणम्, शब्दानां रूपावलिः, पदानां प्रयोगेण वाक्यरचना, ससूत्रं पारिभाषिकसंज्ञास्तत्प्रयुक्तकार्याणि च, सूत्र-वार्तिक-परिभाषा-फक्किकानामर्थापनं लक्ष्ये तत्समन्वयप्रकारश्च, सूत्रार्थसङ्घटनेनाजन्तपुंलिङ्गशब्दानां रूपसिद्धिप्रक्रिया, घिसंज्ञाभावेन सखि-पतिशब्दयोर्विशेषसिद्धिप्रक्रिया, सर्वनामशब्दानां रूपावलिगतस्य सिद्धिप्रक्रियायाश्च वैशिष्ट्यम्, उभ-उभय-कतिशब्दानां रूपावलिगतवैशिष्ट्यञ्च | वर्गीकरणम्<br>सर्वनामशब्दानामर्थप्रकाशनेन सह परिगणनम्<br>पूर्वादिनवशब्दानां त्यदादिशब्दानाञ्च यथाक्रमं लेखनम्<br>ससूत्रं शब्दानां प्रातिपदिकत्वसाधनविधेर्निर्वचनम्<br>सभेदं लिङ्गं परिचाय्य प्रचलितशब्दानां लिङ्गनिदर्शनम्<br>सुप्प्रत्ययानामनुबन्धविनिर्मुक्तस्वरूपणां प्रदर्शनम्<br>सुपामजादित्वादिविशेषधर्माणां निगदनम्<br>विभक्ति-वचनसंज्ञकसूत्रयोरर्थप्रकाशनम्<br>अजन्तपुंलिङ्गप्रातिपदिकेषु विभक्तियोजनेन रूपाणां निष्पादनम्<br>अजन्तपुंलिङ्गशब्दान्निष्पन्नपदेषु प्रातिपदिकविभक्त्योर्वचनस्य च निदर्शनम्<br>ससूत्रं निर्दिष्टसंज्ञानां तत्प्रयुक्तकार्याणाञ्च निगदनम्<br>निर्दिष्टसूत्र-वार्तिक-परिभाषा- | |

| | | | | | |
|---|---|---|---|---|---|
| | | सर्वनामशब्दानां पूर्वादि-त्यदादिविभागपूर्वकं परिगणनम्, सर्वनामप्रयुक्तकार्याणि, उभशब्दस्य सर्वादिगणे पाठस्य प्रयोजनम्,<br>● अङ्ग-विभक्ति-सम्बुद्धि-भ-पद-घि-अपृक्त-उपधा-नदी-षट्-संख्या-लुक्-श्लु-लुप्-गतिसंज्ञाः तत्प्रयुक्तकार्याणि च<br>● **रूपसिद्धिः प्रयोगश्च**<br>अजन्तपुंलिङ्गशब्दास्तत्र-<br>अदन्तेषु रामशब्दः, अजन्तसर्वनामशब्दाः, प्रथमादिशब्दाः, निर्जरशब्दः, पद्दन्नोमास्हृन्निशस.. इत्यादिसूत्रस्थादन्तपुंलिङ्गशब्दाः,<br>आकारान्तेषु<br>विश्वपा-हाहाशब्दौ,<br>इकारान्तेषु<br>हरि-सखि-पति-भूपति-कति-त्रि-द्वि-औडुलोमिशब्दाः,<br>ईकारान्तेषु<br>वातप्रमी-पपी-प्रधी-बहुश्रेयसी-अतिलक्ष्मीशब्दाः, कुमारीमिच्छन् कुमारीवाचरन् वा विग्रहे ब्राह्मणार्थकः कुमारीशब्दः, सुधी-सुखी-सुतीशब्दाश्च,<br>उकारान्तेषु<br>शम्भु-क्रोष्टुशब्दौ,<br>ऊकारान्तेषु | | फक्किकाणां सोदाहरणमर्थप्रकाशनम् सूत्रार्थसङ्घटनेन निर्दिष्टशब्दानां रूपावल्याः साधुत्वप्रकारप्रदर्शनम् साधुपदानां प्रयोगेण वाक्यनिर्माणम् अदन्तसर्वनामशब्दानां पुंलिङ्गे रूपावल्याः कथनं लेखनं वाक्ये प्रयोगनिदर्शनञ्च अजन्तपुंलिङ्गानां प्रसिद्धव्यावहारिकशब्दानारूपावल्याः प्रयोगेण अनुच्छेद-निबन्धादिरचना | |

| | | | | | |
|---|---|---|---|---|---|
| | | हूहू-अतिचमू-खलपू-वर्षाभूशब्दाः,<br>ऋकारान्तेषु<br>धातृ-पितृ-नृशब्दाः,<br>ॠकारान्तेषु<br>कॄ-गम्लॄशब्दौ,<br>एकारान्तेषु सेशब्दः,<br>ओकारान्तेषु<br>स्मृतो-गो-सुद्योशब्दाः,<br>ऐकारान्तेषु रैशब्दः,<br>औकारान्तेषु-ग्लौशब्दः, एतेषां शब्दानां सर्वविभक्तिवचनेषु रूपाणां ससूत्रं सिद्धिप्रक्रिया, उपयुक्तानां तत्सदृशप्रचलितानाञ्च शब्दानां रूपावलिनिर्माणं पदप्रयोगश्च<br>● सूत्र-वार्तिक-परिभाषा-फक्किकानां सोदाहरणमर्थापनं शङ्कोपशङ्कासमाधानञ्च मध्यसिद्धान्तकौमुद्या अजन्तपुंलिङ्गप्रकरणस्था विषयाः | | | |
| ४. | अजन्त-स्त्रीलिङ्गम् | ● **स्त्रीलिङ्गशब्दपरिचयः**<br>आबन्त-ङ्यन्तोङन्त-क्तिन्नन्तशब्दपरिचयः, सर्वनामशब्दानां स्त्रियां टाबन्तरूपाणि, विशेष्यनिघ्नशब्दानां स्त्रीप्रत्ययविशिष्टस्वरूपाणि, लिङ्गविशिष्टपरिभाषया स्त्रीप्रत्ययान्तशब्दानां प्रातिपदिकत्वसाधनम्, अजन्तेषु | अजन्तस्त्रीलिङ्गशब्दस्वरूपम्, स्त्रीप्रत्ययान्तशब्दानां प्रातिपदिकत्वसाधनविधिः, स्त्रीलिङ्गे जायमानानि विशिष्टकार्याणि, अजन्तस्त्रीलिङ्गशब्दानां रूपावलिः प्रतिपदं वाक्येषु प्रयोगश्च, | अजन्तस्त्रीलिङ्गशब्दानां रूपावल्यास्तेषां ससूत्रं सिद्धिप्रक्रियायाश्च निर्वचनं लेखनञ्च,<br>अत्र प्रसङ्गे आगतानां सूत्र-वार्तिक- | १० |

| | | | | | |
|---|---|---|---|---|---|
| | | प्रचलितनियतस्त्रीलिङ्गशब्दाश्च<br>● **प्रकरणगतविशेषकार्यपरिचयः**<br>आबन्तेषु- सोर्हल्ङ्यादिलोपः, औङः शीभावः, सम्बुद्धि-टौस्सु अङ्गान्त्यस्याप एत्वम्, ङिति असर्वनामसु याडागमः सर्वनामसु स्याडागमो ह्रस्वश्च, ङेराम्भावश्च<br>नित्यनदीसंज्ञकेषु ईदूदन्तेषु- सोर्हल्ङ्यादिलोपः, सम्बुद्धौ ह्रस्वः, ङिति आडागमो वृद्धिश्च, ङेरम्भावश्च<br>इदुदन्तनित्यस्त्रीलिङ्गेषु- विकल्पेन नदीसंज्ञा, ङिति नदीसंज्ञाया घिसंज्ञायाश्च प्रयुक्तकार्याणां वैकल्पिकी प्रवृत्तिः<br>● **रूपसिद्धिः प्रयोगश्च**<br>अजन्तस्त्रीलिङ्गशब्दास्तत्र-<br>आकारान्तेषु रमा-सर्वाद्याबन्तसर्वनाम-उत्तरपूर्वा-द्वितीया-तृतीया-अम्बादि-जरा-नासिका-निशाशब्दाः,<br>इकारान्तेषु मति-त्रि-प्रियत्रि-द्विशब्दाः,<br>ईकारान्तेषु गौरी-सखी-लक्ष्मी-स्त्री-अतिस्त्री-श्री-प्रधी-ग्रामणीशब्दाः,<br>उकारान्तेषु धेनु-क्रोष्टुशब्दौ<br>ऊकारान्तेषु वधू-खलपू-पुनर्भू-वर्षाभूशब्दाः,<br>ऋकारान्तेषु- स्वस्रादि-मातृशब्दाः,<br>ओकारान्तेषु- द्योशब्दः | अजन्तस्त्रीलिङ्गशब्दानां ससूत्रं प्रयोगसिद्धिप्रक्रिया, रूपसिद्धिप्रक्रियायां प्रयुक्तानां सूत्रवार्तिकपरिभाषाणां सोदाहरणमर्थावबोधश्च । | परिभाषाणां सोदाहरणमर्थनिर्वचनं लेखनञ्च ।<br>अजन्तस्त्रीलिङ्गशब्दान्निष्पन्नपदानां वाक्येषु प्रयोगप्रकारस्य सोदाहरणं निगदनम् । | |

| | | | | | |
|---|---|---|---|---|---|
| | | ऐकारान्तेषु- रैशब्दः<br>औकारान्तेषु- नौशब्दश्च<br>एतेषां शब्दानां सर्वविभक्तिवचनेषु रूपाणां ससूत्रं सिद्धिप्रक्रिया, उपयुक्तानां तत्सदृशप्रचलितानाञ्च शब्दानां रूपावलिनिर्माणं तत्प्रयोगश्च<br>● सूत्र-वार्तिक-परिभाषा-फक्किकानां सोदाहरणमर्थापनं शङ्कोपशङ्कासमाधानञ्च मध्यसिद्धान्तकौमुद्या अजन्तस्त्रीलिङ्गप्रकरणस्था विषयाः | | | |
| ५. | अजन्त-नपुंसकलिङ्ग-शब्दाध्ययनम् | ● **नपुंसकलिङ्गे रूपावलिगतवैशिष्ट्यपरिचयः**<br>प्रथमाद्वितीययोर्विभक्त्योः समरूपत्वम्, तृतीयादिषु प्रायेण पुंवच्च<br>● **प्रकरणगतविशेषकार्यपरिचयः**<br>अदन्तेषु स्वमोरम्भावः, अदन्तभिन्नेषु स्वमोर्लुक्, लुमति अङ्गकार्याभावस्तस्यानित्यत्वञ्च, सर्वप्रातिपदिकेषु औङः शीभावः, सर्वप्रातिपदिकेषु जश्शसोः शिभावस्तस्य सर्वनामस्थानसंज्ञा तत्प्रयुक्तकार्याणि च, औङः श्यां यस्येति चेति भप्रयुक्तस्य लोपस्याभावः, दीर्घान्तप्रातिपदिकानां ह्रस्वः, इगन्तेषु अजादौ विभक्तौ नुमागमः, अस्थ्यादीनां टादावचि अनङादेशश्च<br>● **रूपसिद्धिः प्रयोगश्च**<br>अजन्तनपुंसकलिङ्गशब्दास्तत्र- | अजन्तनपुंसकशब्दानां रूपावलिः प्रतिपदं वाक्येषु प्रयोगश्च, अजन्तनपुंसकशब्दानां ससूत्रं प्रयोगसिद्धिप्रक्रियाया, तत्र क्रमे प्रयुक्तानां सूत्रवार्तिकादीनां सोदाहरणमर्थावबोधश्च । | अजन्तनपुंसकशब्दानां रूपावल्यास्तेषां ससूत्रं सिद्धिप्रक्रियायाश्च निर्वचनं लेखनञ्च,<br>अत्र प्रसङ्गे आगतानां सूत्र-वार्तिकादीनां सोदाहरणमर्थनिर्वचनं लेखनञ्च<br>प्रचलिताजन्तनपुंसकलिङ्गशब्दाद् निष्पन्नपदानां वाक्येषु प्रयोगप्रकारनिगदनम् । | १० |

| | | | | | |
|---|---|---|---|---|---|
| | | अकारान्तेषु ज्ञान-कतर-एकतर-अजर-हृदय-उदक-आस्य-मांसशब्दा अदन्तसर्वनामशब्दाश्च,<br>आकारान्तेषु श्रीपाशब्दः,<br>इकारान्तेषु वारि-अनादि-अस्थ्यादिशब्दाः,<br>ईकारान्तेषु सुधी-प्रधीशब्दौ<br>उकारान्तेषु मधु-सानु-प्रियक्रोष्टुशब्दाः,<br>ऊकारान्तेषु सुलूशब्दः,<br>ऋकारान्तेषु धातृज्ञातृकर्तृशब्दाः,<br>ओकारान्तेषु प्रद्योशब्दः,<br>ऐकारान्तेषु प्ररैशब्दः,<br>औकारान्तेषु सुनौशब्दः<br>एतेषां शब्दानां रूपावल्याः ससूत्रं सिद्धिप्रक्रिया, उक्तानां तत्सदृशप्रचलितानाञ्च शब्दानां रूपावल्या निर्माणं पदप्रयोगश्च<br>● सूत्र-वार्तिक-परिभाषाणां सोदाहरणमर्थापनं शङ्कोपशङ्कासमाधानञ्च<br>मध्यसिद्धान्तकौमुद्या अजन्तनपुंसकलिङ्गप्रकरणस्था विषयाः | | | |
| सैद्धान्तिकाभ्यासः | | | | | ४८ |
| प्रयोगाभ्यासः | | | | | १६ |
| योगः | | | | | ६४ |

**न्यायखण्डः (कवर्गे व्याकरणविषयमवलम्ब्याधीयानां छात्राणां कृते)**

| क्र. सं. | विषयक्षेत्राणि | विषयाः | बोधः | प्रयोगः | कार्य घण्टा: |
|---|---|---|---|---|---|
| १. | न्यायवैशेषिकशास्त्रयोः प्रथिताः पारिभाषिकशब्दाः | उद्देशः, लक्षणम्, परीक्षा, लक्ष्यता, लक्षणता, अवच्छेदकः, अवच्छेद्यः, अव्याप्तिः, अतिव्याप्तिः, असम्भवः, व्याप्यत्वम्, व्यापकत्वम्, प्रतियोगिता, अनुयोगिता, कार्यता, कारणता इत्यादयः पारिभाषिकशब्दाः | उद्देश-लक्षण-परीक्षा-लक्ष्यता-लक्षणता-अवच्छेदक-अवच्छिन्न-अव्याप्ति-अतिव्याप्ति-असम्भव-व्याप्यत्व-व्यापकत्व-प्रतियोगिता-अनुयोगिता-कार्यता-कारणतादिशब्दानामर्थबोधः | उद्देश- लक्षण- परीक्षा- लक्ष्यता-लक्षणता-अवच्छेदक-अवच्छिन्न-अव्याप्ति-अतिव्याप्ति- असम्भव- व्याप्यत्व-व्यापकत्व-प्रतियोगिता-अनुयोगिता-कार्यता- कारणतादिशब्दानाम् उदाहरणसहितवाक्येषु प्रयोगः । | ५ |
| २ | वैशेषिकशास्त्राभिमतपदार्थोद्देशः, मनोऽन्तद्रव्यपदार्थाश्च | द्रव्यादयः सप्तपदार्थाः, पृथिवी द्रव्यम्, पृथिव्याः भेदः, पृथिव्याः शरीरेन्द्रियविषयाः, जलद्रव्यम्, जलस्य भेदः, जलस्य शरीरेन्द्रियविषयाः, तेजो द्रव्यम्, तेजसो भेदः, तैजसशरीरेन्द्रियविषयाः, वायुर्द्रव्यम्, वायोर्भेदः, वायवीयाः शरीरेन्द्रियविषयाः, आकाशद्रव्यम्, कालद्रव्यम्, दिग्द्रव्यम्, आत्मद्रव्यम्, आत्मनो भेदः, | द्रव्यादीनां सप्तपदार्थानां नाममात्रेण बोधः, पृथिव्याः लक्षणबोधः, पृथिव्या भेदज्ञानम्, पृथिव्याः शरीरेन्द्रियविषयभेदेन कार्यबोधः, जलद्रव्यस्य लक्षणबोधः, जलद्रव्यस्य भेदज्ञानम्, जलस्य शरीरेन्द्रियविषयभेदेन कार्यबोधः, तेजसो लक्षणबोधः, तेजसो भेदज्ञानम्, तैजसशरीरेन्द्रियविषयभेदेन कार्यबोधः, वायुद्रव्यस्य लक्षणबोधः, वायोर्भेदज्ञानम्, वायवीयशरीरेन्द्रियविषयभेदेन | द्रव्यादीनां सप्तपदार्थानां नाममात्रेण सङ्कीर्तनम्, पृथिव्या लक्षणकथनम्, पृथिव्या भेदनिरूपणम्, पृथिव्याः शरीरेन्द्रियविषयरूपत्रिविधभेदकथनम्, जलद्रव्यस्य लक्षणनिर्वचनम, जलद्रव्यस्य भेदनिरूपणम्, जलस्य शरीरेन्द्रियविषयरूपत्रिविधभेदनिरूपणम्, तेजसो लक्षणनिर्वचनम्, तेजसो भेदकथनम्, तेजसः शररेन्द्रियविषयरूपत्रिविधभेदनिरूपणम्, वायोर्लक्षणकथनम्, वायोर्भेदनिरूपणम् , वायोः शरीरेन्द्रियविषयरूपत्रिविधभेदकथनम्, | १४ |

| | | | | | |
|---|---|---|---|---|---|
| | | मनो द्रव्यम्, मनसः परमाणुरूपत्वम् । | कार्यबोधः, आकाशस्य लक्षणबोधः, कालस्य लक्षणबोधः, दिग्द्रव्यस्य लक्षणबोधः, आत्मद्रव्यस्य लक्षणबोधः, आत्मनो भेदज्ञानम्, मनसो लक्षणज्ञानम्, मनसः परमाणुरूपत्वबोधः । | आकाशलक्षणकथनम्, कालद्रव्यस्य लक्षणनिर्वचनम्, दिग्द्रव्यस्य लक्षणकथनम्, आत्मद्रव्यस्य लक्षणकथनम्, आत्मनो भेदनिरूपणम्, मनसो लक्षणकथनम्, मनसः परमाणुत्वसाधनम् । | |
| ३ | शब्दान्तगुणाः | भेदसहितं रूपम्, भेदसहितो रसः, गन्धो गन्धाश्रयश्च, स्पर्शः स्पर्शाश्रयश्च, सङ्ख्याः, परिमाणानि, पृथक्त्वम्, संयोगगुणः, विभागगुणः, परत्वापरत्वे, गुरुत्वद्रवत्वे, स्नेहशब्दौ च । | सभेदरूपज्ञानम्, भेदसहितानां रसानामवबोधः, गन्धस्य गन्धाश्रयस्य चावबोधः, स्पर्शगुणस्य स्पर्शाश्रयस्य चावबोधः, सङ्ख्याया बोधः, परिमाणस्य ज्ञानम्, पृथक्त्वबोधः, संयोगस्यावबोधः, विभागगुणस्य बोधः, परत्वापरत्वयोरवबोधः, गुरुत्वद्रवत्वयोर्ज्ञानम्, स्नेहशब्दयोर्बोधः । | सभेदरूपप्रतिपादनम्, भेदसहितरसनिरूपणम्, गन्धस्य गन्धाश्रयस्य च कथनम् , स्पर्शस्य स्पर्शाश्रयस्य च निरूपणम्, सङ्ख्यानिरूपणम्, परिमाणकथनम्, पृथक्त्वसाधनम् , संयोगनिरूपणम्, विभागविभजनम्, परत्वापरत्वयोर्विचारः, गुरुत्वद्रवत्वयोर्निरूपणम्, स्नेहस्य शब्दस्य चोपस्थापनम् । | ८ |
| ४. | बुद्धिः, बुद्धिभेदाः, कारणम्, कारणभेदाश्च | बुद्धिलक्षणम्, बुद्धिभेदश्च, स्मृतिरनुभवश्च, यथार्थायथार्थानुभवलक्षणे, करणसहितकारणानि, कारणभेदाः, सोदाहरणं समवायिकारणलक्षणम्, सोदाहरणमसमवायिकारणलक्षणम्, निमित्तकारणलक्षणम् । | बुद्धिलक्षणस्य तद्विभागस्य च ज्ञानम्, स्मृतेरनुभवस्य चोदाहरणलक्षणबोधः, यथार्थानुभवलक्षणस्य ज्ञानमयथार्थानुभवलक्षणस्य च बोधः, करणसहितकारणानामवबोधः, समवाय्यसमवायिनिमित्ततया | बुद्धेर्लक्षणनिर्वचनं बुद्धिभेदकथनञ्च्, स्मृतेरनुभवस्य च सोदाहरणं लक्षणप्रतिपादनम्, यथार्थायथार्थानुभवयोर्वर्णनम्, करणसहितकारणलक्षणनिरूपणम्, समवाय्यसमवायिनिमित्ततया कारणस्य त्रैविध्यप्रतिपादनम्, सोदाहरणं | ८ |

| | | | | | |
|---|---|---|---|---|---|
| | | | कारणभेदज्ञानम्, सोदाहरणं समवायिकारणलक्षणबोधः, सोदाहरणमसमवायिकारणलक्षणबोधः, निमित्तकारणलक्षणबोधः । | समवायिकारणलक्षणप्रतिपादनम्, सोदाहरणमसमवायिकारणलक्षणप्रतिपादनम्, निमित्तकारणलक्षणनिरूपणम् । | |
| **५** | प्रत्यक्षप्रमाणम्, प्रत्यक्षप्रमा च | प्रत्यक्षप्रमाणलक्षणम्, प्रत्यक्षप्रमालक्षणम्, प्रत्यक्षप्रमाभेदः, सन्निकर्षः, प्रत्यक्षप्रमाणोपसंहारः । | प्रत्यक्षप्रमाणलक्षणस्यावबोधः, प्रत्यक्षप्रमाया लक्षणावबोधः, प्रत्यक्षप्रमाभेदज्ञानम्, प्रत्यक्षप्रमाकारणीभूतसन्निकर्षस्य सन्निकर्षभेदस्य च ज्ञानम्, प्रत्यक्षप्रमाणोपसंहरीतिज्ञानम् । | प्रत्यक्षप्रमाणलक्षणस्य प्रतिपादनम्, प्रत्यक्षप्रमालक्षणनिरूपणम्, प्रत्यक्षप्रमाभेदप्रदर्शनम्, प्रत्यक्षप्रमाकारणीभूतसन्निकर्षस्य सन्निकर्षभेदस्य च प्रतिपादनम्, प्रत्यक्षप्रमाणोपसंहारप्रदर्शनम् । | १३ |
| सैद्धान्तिकाभ्यासः | | | | | ४८ |
| प्रयोगाभ्यासः | | | | | १६ |
| योगः | | | | | ६४ |

कक्षा - १०

**भाषाखण्डः**

| **क्र.सं** | **विषयः** | **प्रकरणम्** | **पाठ्यांशविवरणम्** | **बोधः** | **अभिव्यक्तिः** | **पाठ्यविषया-नुशीलनम्** | **का.घ.** |
|---|---|---|---|---|---|---|---|
| १ | पद्यम् | (क) महाकाव्यांशः (ख) दार्शनिकपद्यम् (ग) नीतिपद्यम् | (क) श्रीमद्भगवद्गीतायाः निष्कामकर्मसम्बद्धानि पञ्च पद्यानि (ख) मेघदूतकाव्यस्य | पद्यस्य लयबोधः, पद्यप्रयुक्तच्छन्दोबोधः, पद्यगतपदानामर्थबोधः, पद्यगतपदानां व्युत्पत्तिबोधः, | पद्यानां सलयं वाचनम् पद्यप्रयुक्तच्छन्दोलक्षणा-भिव्यञ्जनम् पद्यानामन्वयकरणम् पद्यानां भावार्थप्रकाशनम् | पद्यप्रयुक्तच्छन्दस उदाहरणान्तरान्वेषणं तत्समन्वयप्रदर्शनम् पद्यानां तात्पर्यानुशीलनम् | ९ |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| | | | प्रकृतिसम्बद्धानि पञ्च पद्यानि<br>(ग) शुक्रनीतेः पञ्चपद्यानि | पद्यस्य वाक्यार्थबोधः,<br>श्रीमद्भगवद्गीतायाः सन्दर्भस्रोतोबोधः,<br>निष्कामकर्मयोगस्य महत्त्वबोधः ।<br>कालिदासस्य सामान्यपरिचयबोधः,<br>प्रकृतेः सौन्दर्यबोधः, | पद्यगतपदानां सव्युत्पत्तिकं पर्यायार्थप्रदर्शनम्,<br>मेघदूतपद्यान्याधृत्य प्रकृतेः सौन्दर्यवर्णनम्,<br>गीतापद्यान्याधृत्य निष्कामकर्मयोगस्य परिचयप्रदानम् । | पद्यानां गद्ये रूपान्तरणम्<br>पौरस्त्ये प्रकृतिचित्रणसम्बद्धानां काव्यपद्यान्तराणामन्वेषणेन प्रकृतेः सौन्दर्याख्यापनम्,<br>निष्कामकर्मयोगस्य व्यवहारोपयोगित्वसाधनम् । | |
| २ | गद्यम् | कथा | (क) ऐतिहासिकी<br>(ख) लोकप्रचलिता | कथाया विषयवस्तुबोधः,<br>कथासन्देशबोधः,<br>कथावस्तुनः स्रोतोबोधः,<br>कथाया आदर्शपक्षबोधः<br>कथायाः शिक्षाबोधः | संक्षेपेण कथाकथनम्,<br>कथायाः सन्देशप्रकटनम्,<br>कथायाश्चरित्राणां चरितोद्घाटनम्,<br>कथायाः परिवेशविमर्शनम्,<br>ऐतिहासिककथाविषयस्य ऐतिह्यप्रदर्शनम्,<br>लोककथायाः ग्राह्यपक्षनिरूपणम्,<br>कथागतविषयात् प्रश्ननिर्माणमुत्तर-लेखनञ्च । | कथायां प्रयुक्तानां व्यावहारिकपद-वाक्यानामन्वेषणम्,<br>चरित्राणां सन्देशस्य च दृष्ट्या कथाया विश्लेषणम्,<br>ऐतिहासिककथायाः सन्देशस्य स्वजीवने सदुपयोगविधिनिरूपणम्<br>लोकप्रचलितकथाया विषयस्य समाजोपयोगित्वसाधनम्<br>कथासूत्राण्याधृत्य लघुकथाविरचनम्,<br>मनोहारितया स्वशब्दैः कथायाः कथनम् । | ९ |
| ३ | गद्यम् | प्रबन्धः | (क) प्राणायामविषयकः | प्रबन्धवर्णितविषयबोधः,<br>प्रबन्धरचनाशैलीबोधः,<br>प्रबन्धस्य निष्कर्षबोधः, | प्रबन्धस्य विषयवस्तुन उपयोगित्वप्रकाशनम्,<br>प्रबन्धस्य निष्कर्षप्रकटनम्, | गद्यप्रकारदृष्ट्या प्रबन्धसमीक्षणम्,<br>प्रबन्धवर्णितविषयस्य | १० |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| | | | | प्रबन्धस्य सारांशावबोधः, प्राणायामस्य परिचयबोधः, प्राणायामस्य महत्त्वबोधः | प्रबन्धस्य रचनाशैलीविमर्शनम्, प्रबन्धस्य विषयवस्तुविन्यास-क्रमकथनम्, प्राचीनशल्यतन्त्रस्य महत्त्वकथनम्, योगसाधनायां प्राणायामस्य महत्त्वाख्यापनम् प्राणायामप्रकारनिरूपणम् प्रबन्धवर्णितविषयात् प्रश्ननिर्माणमुत्तर-लेखनञ्च । | प्रभावनिरूपणम्, प्रबन्धस्य संयोजनशिल्पनिदर्शनम्, प्रबन्धस्य विषयसङ्गति-निर्देशनम्, योगस्याष्टाङ्गेषु प्राणायामस्य स्थाननिर्धारणम्, स्वास्थ्ये प्राणायामस्य लाभनिरूपणम्, स्वानुभूतविषयेषु प्रबन्धरचनाभ्यासः । | |
| ४. | गद्यम् | जीवनवृत्तम् | कणादस्य | कणादस्य कालकृत्यादिबोधः, कणादस्य दार्शनिकावदानावबोधः, वैशेषिकदर्शनस्य परिचयबोधः, वैशेषिकदर्शनस्य महत्त्वबोधः । | पौरस्त्यवाङ्मये कणादस्य योगदानाख्यापनम् , कणादजीवनवृत्तस्य प्रेरकपक्षप्रकटनम्, पौरस्त्यदर्शनेषु वैशेषिकदर्शनस्य स्थाननिरूपणम् वैशेषिकदर्शनस्य वैज्ञानिकत्वसाधनम् पाठमाधृत्य कणादस्य व्यक्तिवृत्तनिर्माणम् जीवनवृत्तमाधृत्य प्रश्ननिर्माणमुत्तर-लेखनञ्च । | दर्शनक्षेत्रे कणादस्य स्थाननिर्धारणम्, वैशेषिकदर्शनस्य सर्वशास्त्रोपकारकत्वसाधनम् सूत्राण्याधृत्य कस्यचिद् दार्शनिकस्य जीवनवृत्तलेखनम्, स्वपितुः जीवनस्य प्रमुखघटनानां सूत्रीकरणम् । | ५ |
| ५. | दृश्य-काव्यम् | लघुनाटकम् | जनचेतनासम्बद्धं सामाजिकम् | लघुनाटकविषयवस्तुबोधः, लघुनाटकसन्देशबोधः, लघुनाटकस्य चरित्राणां चारित्रिकवैशिष्ट्यबोधः, लघुनाटकस्य | लघुनाटकस्य सरलार्थप्रकाशनम्, लघुनाटकस्य तात्पर्यानुशीलनम्, नाटकस्य चरित्राणां चित्रणम्, लघुनाटकस्य परिवेशविमर्शनम्, लघुनाटकविषयात् प्रश्ननिर्माणमुत्तर- | लघुनाटके नाट्यलक्षणानु-सन्धानम्, लघुनाटके प्रयुक्तानां व्यावहारिकाणां पदवाक्यानां गवेषणम्, | ५ |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| | | | | भाषिककौशलाभिबोधः, नाटककर्तुः परिचयबोधः । | लेखनञ्च । | लघुनाटके प्रयुक्तानामव्यय-पदानामौचित्यविमर्शनम्, अभिनेयताया दृष्ट्या नाटकस्य विश्लेषणम्, लघुनाटकस्य सामजिकतत्त्वप्रकाशनम् नाटकाभिनयः । | |
| ६. | गद्यम् | प्रवचनम् | आहारसंयमविषयकम् | प्रवचनस्य स्वरूपबोधः, प्रवचनप्रकटनविधिबोधः, पाठगतवाक्यानां सरलार्थबोधः, आहारसंयमस्य महत्त्वबोधः, आहारसंयमाभावस्य हानिबोधः । | प्रदत्तसूत्राण्याधृत्य प्रदत्तविषये प्रवचनप्रकटनम्, कस्यचिद् विषयस्य अध्ययनेन प्रवचनस्य कृते सूत्राणां निर्माणम्, आहारसंयमस्य महत्त्वाख्यापनम्, आहारसंयमस्य स्वास्थ्यरक्षकत्वनिरूपणम्, पाठमाधृत्य प्रश्ननिर्माणमुत्तर-लेखनञ्च । | समुचितविषये कस्यचिद् विशेषज्ञस्य प्रवचनकार्यक्रमायोजनम्, हितभोजनस्य मितभोजनस्य चौचित्यनिरूपणम्, स्वास्थ्यसंरक्षणायाहारसंयमः इति विषये वक्तृत्वकार्यक्रमायोजनम् । | ५ |
| ७ | काव्य-शास्त्रम् | छन्दः | वसन्ततिलकम्, मालिनी, पञ्चचामरम्, शिखरिणी, मन्दाक्रान्ता, शार्दूल-विक्रीडितम्, स्रग्धरा, सुन्दरी इत्येतेषां वृत्तानां ससमन्वयं लक्षणोदाहरणानि । | लक्षणोदाहरणबोधः, द्वयोर्वृत्तयोः परस्परं पार्थक्यबोधः, पद्यानां छन्दोलक्षण-समन्वयबोधः । | लक्षणोदाहरणा-भिव्यक्तिः, द्वयोर्वृत्तयोः परस्परं पार्थक्यविमर्शनम्, पठितच्छन्दसः पद्यानां छन्दोनिरूपणम् । | समानाक्षरयुतानां वृत्तानां वर्गीकरणम्, अधीतलक्षणानां वृत्तानामुदाहरणा-न्तरान्वेषणम्, अधीतछन्दःसु मौलिकपद्य-लेखनाभ्यासः । | ५ |
| ८. | भाषा-तत्वम् | भाषातत्वानुशीलनम् | | निर्दिष्टलकाराणामर्थबोधः निर्दिष्टलकाराणां प्रयोगविधिबोधः निर्दिष्टप्रत्ययान्तपदानामर्थबोधः | निर्दिष्टलकाराणामर्थकथनम् निर्दिष्टलकाराणां प्रयोगेण निर्मितानां वाक्यानां कथनम् निर्दिष्टप्रत्ययान्तपदानामर्थाभिव्यञ्जनम्, | निर्दिष्टलकाराणां प्रयोगेण स्वाभिप्रायप्रकटनम् निर्दिष्टप्रत्ययान्तानां पदानां प्रयोगेण घटनावर्णनम् | ४८ |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| | | | | निर्दिष्टप्रत्ययान्तपदानां प्रयोगस्थलबोधः<br>वाच्यप्रकारबोधः<br>वाच्यप्रयोगस्थलबोधः<br>वाच्यपरिवर्तनविधिबोधः<br>निर्दिष्टप्रत्ययान्तानां धातूनामर्थबोधः<br>निर्दिष्टप्रत्ययान्तानां धातूनां क्रियापदानां प्रयोगविधिबोधः | निर्दिष्टप्रत्ययान्तपदानां प्रयोगेण वाक्यनिर्माणम्<br>वाच्यप्रकारनिरूपणम्<br>नियमानुसारेण वाच्यानां प्रयोगः,<br>एकस्य वाच्यस्य वाक्यानामपरवाक्ये परिवर्तनम्<br>निर्दिष्टप्रत्ययान्तानां धातूनामर्थाभिव्यक्तिः,<br>निर्दिष्टप्रत्ययान्तानां धातूनां क्रियापदानां प्रयोगेण प्रेरणार्थ-इच्छार्थ-भृशार्थद्योतकवाक्यनिर्माणम्<br>सामान्यार्थकवाक्यस्य प्रेरणार्थे, प्रेरणार्थकवाक्यस्य सामान्यार्थे च परिवर्तनम् | काल-पक्ष-भावाधारे अनुच्छेदगतवाक्यानां परिवर्तनम्<br>भावकर्मवाच्ययोः प्रयोगेण स्वानभूतविषयस्य वर्णनम्<br>भावकर्मवाच्ययोः प्रयोगेण निर्मितस्यानुच्छेदस्य कर्तृवाच्ये परिवर्तनम्<br>प्रेरणार्थकवाक्यैः मातुः दैनन्दिन्याः वर्णनम्<br>इच्छार्थकवाक्यैः स्वोद्देश्यनिरूपणम् । | |
| सैद्धान्तिकाभ्यासः | | | | | | | ४८ |
| प्रयोगात्मकाभ्यासः | | | | | | | १६ |
| योगः | | | | | | | ६४ |

द्रष्टव्यः कार्यमूलकव्याकरणस्यावधारणायाः अवलम्बनं कृत्वा लट्-लृट्-लङ्-लोट्लकारप्रयोगः, शतृ-शानच्-क्त-क्तवतु-यत्-ण्यत्-तव्यत्-अनीयर्-प्रत्ययान्तपदप्रयोगः, वाच्यपरिवर्तनप्रयोगः, णिच्-सन्-यङ्प्रत्ययान्तधातूनां क्रियापदप्रयोगश्च कर्तव्यः ।

**व्याकरणखण्डः (कवर्गे नव्यव्याकरणेतरविषयमवलम्ब्य अधीयानानां छात्राणां कृते)**

| **क्र. सं.** | **प्रकरणानि** | **विषयक्षेत्रम्** | **बोधः** | **अभिव्यक्तिः** | **कार्य घण्टाः** |
|---|---|---|---|---|---|
| १ | हलन्तपुंलिङ्गः | ● **हलन्तशब्दपरिचयः**<br>अव्युत्पन्नाव्युत्पन्नभेदौ, क्विप्-क्विन्-क्तिन्-क्तवतु-शतृप्रत्ययान्तशब्दपरिचयः,<br>हलन्ताः त्यदादयः सङ्ख्यावाचकाश्च शब्दाः | | | १० |

| | | | | | |
|---|---|---|---|---|---|
| | | **● प्रकरणगतविशेषकार्यपरिचयः**<br>सोर्हल्ङ्यादिलोपः, सुटः सर्वनामस्थानसंज्ञा तद्भिन्नासु अजादिषु हलादिषु च अङ्गस्य क्रमाद् भ-पदसंज्ञा तत्प्रयुक्तकार्याणि च, हकारान्तेषु पदान्ते झलि च ह्रस्य ढत्वम्, दुहद्रुहादिषु घत्वं वैकल्पिकघत्वं भष्भावश्च, सम्प्रसारणसंज्ञा, वह्-श्वन्-युवन्-मघवन्-विद्वस्शब्देषु भस्य सम्प्रसारणम्, सम्प्रसारणे परे सम्प्रसारणाभावः, नकारान्तेषु सम्बुद्धिभिन्नसर्वनामस्थानेषु उपधादीर्घः, सम्बुद्धौ नलोपाभावः, भ्यामादिहलादौ पदान्तनलोपस्तस्यासिद्धत्वञ्च, अन्नन्तेषु भस्याकारलोपश्च, अदस्पर्यन्तानां त्यदादिशब्दानां अत्वपररूपेण किमः कादेशेन च अदन्तत्वमनन्त्ययोस्तदोः सौ सत्वमदस उत्वमत्वञ्च, युष्मदस्मदोः सर्वप्रातिपदिकभिन्नप्रक्रिया, उगिदन्तानां सर्वनामस्थाने नुमागमः, कृत्संज्ञा, क्विन्सम्बद्धकुत्वम्, झलि पदान्ते च चोः कुत्वं व्रश्चादेः षत्वञ्च, पदान्ते रेफवान्तयोर्धात्वोरुपधाया इको दीर्घश्च<br>**● रूपसिद्धिः प्रयोगश्च**<br>हान्त-वान्त-रान्त-मान्त-नान्त-जान्तपुंलिङ्गशब्दास्तत्र-<br>हकारान्तेषु लिह्-दुह्-द्रुहादि-विश्ववाह्-अनडुह्-तुरासाह्शब्दाः,<br>वकारान्तेषु सुदिव्शब्दः,<br>रेफान्तेषु चतुर्-प्रियचतुर्शब्दौ,<br>लकारान्तेषु कमल्शब्दः,<br>मकारान्तेषु प्रशाम्-किम्-इदम्शब्दाः,<br>णकारान्तेषु सुगण्शब्दः,<br>नकारान्तेषु राजन्-यज्वन्-वृत्रहन्-शाङ्गिन्-यशस्विन्-मघवन्-युवन्-श्वन्-अर्वन्-पथिन्-पञ्चन्-परमपञ्चन्-प्रियपञ्चन्-अष्टन्-प्रियाष्टन्शब्दाः,<br>धकारान्तेषु बुध्शब्दः,<br>जकारान्तेषु युज्-सुयुज्-खञ्ज्-राज्-परिव्राज्-विश्वराज्-भृज्ज्-ऋत्विज्-ऊर्ज्शब्दाः ।<br>एतेषां शब्दानां रूपावल्याः ससूत्रं सिद्धिप्रक्रिया,<br>उक्तानां तत्सदृशप्रचलितानाञ्च शब्दानां रूपावलिनिर्माणं तत्प्रयोगश्च | निर्दिष्टशब्दानां रूपावलिः प्रतिपदं वाक्येषु प्रयोगश्च, निर्दिष्टशब्दानां रूपावल्याः ससूत्रं सिद्धिप्रक्रिया, तत्र क्रमे आगतानां सूत्रवार्तिकफक्किकापरिभाषाणां सोदाहरणमर्थावबोधश्च । | निर्दिष्टशब्दान्निष्पन्नपदैः वाक्यरचना<br>निर्दिष्टशब्दानां ससूत्रं सिद्धिप्रक्रियाया निर्वचनं लेखनञ्च<br>निर्दिष्टसूत्र-वार्तिक-फक्किका-परिभाषाणां सोदाहरणमर्थनिर्वचनं लेखनञ्च | |

| | | | | | |
|---|---|---|---|---|---|
| | | ● सूत्र-वार्तिक-परिभाषा-फक्किकानां सोदाहरणमर्थापनं शङ्कोपशङ्कासमाधानञ्च मध्यसिद्धान्तकौमुद्या हलन्तपुंलिङ्गप्रकरणस्था विषयाः । | | | |
| २. | हलन्तपुंलिङ्गः | ● **रूपसिद्धिः प्रयोगश्च**<br>दान्त-थान्त-चान्त-तान्त-शान्त-षान्त-सान्तपुंलिङ्गशब्दास्तत्र- दकारान्तेषु त्यद्-तद्-अतित्यद्-यद्-एतद्-युष्मद्-अस्मद्-अतियुष्मद्-अत्यष्मद्-सुपाद्शब्दाः,<br>थकारान्तेषु अग्निमथ्शब्दः,<br>चकारान्तेषु प्राञ्च्-प्रत्यञ्च्-अदसञ्च्-उदञ्च्-सम्यञ्च्-पयोमुच्शब्दाः,<br>तकारान्तेषु महत्-धीमत्-गोमत्-भवत्-ददत्शब्दाः,<br>पकारान्तेषु गुप्शब्दः,<br>शकारान्तेषु तादृश्-विश्-नश्-घृतस्पृश्शब्दाः,<br>षकारान्तेषु दधृष्-रत्नमुष्-षष्-परमषष्-प्रियषष्-पिपठिष्-चिकीर्ष्-दोष्-विविक्ष्-गोरक्ष्शब्दाः,<br>सकारान्तेषु सुपिस्-विद्वस्-सेदिवस्-पुंस्-उशनस्-वेधस्-अदस्शब्दाः ।<br>एतेषां शब्दानां रूपावल्याः ससूत्रं सिद्धिप्रक्रिया,<br>उक्तानां तत्सदृशप्रचलितानाञ्च शब्दानां रूपावलिनिर्माणं पदप्रयोगश्च<br>● सूत्र-वार्तिक-परिभाषा-फक्किकानां सोदाहरणमर्थापनं शङ्कोपशङ्कासमाधानञ्च मध्यसिद्धान्तकौमुद्या निर्दिष्टप्रकरणस्था विषयाः । | निर्दिष्टशब्दानां रूपावलिः प्रतिपदं वाक्येषु प्रयोगश्च, हलन्तपुंलिङ्गशब्दानां रूपावल्याः ससूत्रं सिद्धिप्रक्रिया, तत्र क्रमे आगतानां सूत्रवार्तिकफक्किकापरिभाषाणां सोदाहरणम् अर्थावबोधश्च । | निर्दिष्टशब्दानां रूपावल्या वाक्येषु प्रयोगः<br>निर्दिष्टशब्दानां ससूत्रं सिद्धिप्रक्रियाया निर्वचनं लेखनञ्च,<br>निर्दिष्टसूत्र-वार्तिक-फक्किका-परिभाषाणां सोदाहरणमर्थनिर्वचनं लेखनञ्च | १० |
| ३. | हलन्तस्त्रीलिङ्गः | ● **रूपसिद्धिः प्रयोगश्च**<br>हलन्तस्त्रीलिङ्गशब्दास्तत्र-<br>उपानह्-उष्णिह्-दिव्-गिर्-चतुर्-किम्-इदम्-स्रज्-त्यद्-तद्-यद्-एतद्-वाच्-अप्-दिश्-त्विष्-सजुष्-आशिष्-अदस्शब्दाः<br>एतेषां शब्दानां रूपावल्याः ससूत्रं सिद्धिप्रक्रिया, | हलन्तस्त्रीलिङ्गशब्दानां रूपावल्या अववोधो वाक्येषु तत्प्रयोगश्च,<br>हलन्तस्त्रीलिङ्गशब्दानां | हलन्तस्त्रीलिङ्गशब्द-निष्पन्नपदानां वाक्येषु प्रयोगः,<br>हलन्तस्त्रीलिङ्गशब्दानां | १० |

| | | | | | |
|---|---|---|---|---|---|
| | | उक्तानां तत्सदृशप्रचलितानाञ्च शब्दानां रूपावलिनिर्माणं पदप्रयोगश्च<br>● सूत्राणां सोदाहरणमर्थापनं शङ्कोपशङ्कासमाधानञ्च<br>मध्यसिद्धान्तकौमुद्या हलन्तस्त्रीलिङ्गप्रकरणस्था विषयाः । | रूपावल्याः ससूत्रं सिद्धिप्रक्रियाया अवबोधः, रूपसिद्धिप्रक्रियामागतानां सूत्राणां सोदाहरणमर्थावबोधश्च । | ससूत्रं सिद्धिप्रक्रियाया निर्वचनं लेखनञ्च, निर्दिष्टसूत्र-वार्तिकाणां सोदाहरणमर्थनिर्वचनं लेखनञ्च | |
| ४. | हलन्तनपुंसकलिङ्गः | ● **रूपसिद्धिः प्रयोगश्च**<br>हलन्तनपुंसकलिङ्गशब्दास्तत्र-<br>स्वनडुह्-विमलदिव्-वार्-किम्-इदम्-ब्रह्मन्-अहन्-दण्डिन्-स्रग्विन्-वाग्मिन्-बहुवृत्रहन्-असृज्-ऊर्ज्-त्यद्-तद्-यद्-एतद्-बेभिद्-गवाच्-यकृत्-शकृत्-ददत्-तुदत्-भात्-पचत्-दीव्यत्-स्वप्-धनुष्-पिपठिष्-पयस्-सुपुंस्-अदस्शब्दाः ।<br>एतेषां शब्दानां रूपावल्याः ससूत्रं सिद्धिप्रक्रिया,<br>उक्तानां तत्सदृशप्रचलितानाञ्च शब्दानां रूपावलिनिर्माणं पदप्रयोगश्च<br>● सूत्र-वार्तिकाणां सोदाहरणमर्थापनं शङ्कोपशङ्कासमाधानञ्च<br>मध्यसिद्धान्तकौमुद्या हलन्तनपुंसकलिङ्गप्रकरणस्था विषयाः । | हलन्तनपुंसकलिङ्गशब्दानां रूपावल्यास्तत्प्रयोगेण वाक्यनिर्माणप्रकारस्य चावबोधः, हलन्तनपुंसकशब्दानां रूपावल्याः ससूत्रं सिद्धिप्रक्रियाया अवबोधः, निर्दिष्टसूत्रवार्तिकाणां सोदाहरणमर्थावबोधश्च । | हलन्तनपुंसकशब्दनिष्पन्न-पदानां वाक्येषु प्रयोगः निर्धारितशब्दानां ससूत्रं सिद्धिप्रक्रियाया निर्वचनं लेखनञ्च, निर्दिष्टसूत्र-वार्तिकाणां सोदाहरणमर्थनिर्वचनं लेखनञ्च । | १० |
| ५. | अव्ययप्रकरणम् | ● **सार्थमव्ययशब्दपरिचयः**<br>अव्ययलक्षणम्, स्वरादि-चादिशब्दास्तेषां सार्थं परिगणनञ्च, तद्धितप्रत्ययान्तेषु तसिलाद्यसर्वविभक्तिशब्दाः, कृदन्तेषु मान्ता एजन्ताः क्त्वा-तोसुन्-कसुन्प्रत्ययान्ताश्च शब्दाः, अव्ययीभावसमासनिष्पन्नशब्दाश्च<br>● **पदत्वसाधनं प्रयोगश्च**<br>अव्ययसंज्ञाविधायकानि सूत्राणि, अव्ययाद्विहितस्य सुपो लुग्विधिः, अव्ययानां ससूत्रं पदत्वसाधनम्, अदन्ताव्ययीभावसमासानां पञ्चमीभिन्नविभक्तिषु अम्भावेन, तृतीयासप्तम्योश्च वैकल्पिकेनाम्भावेन, पञ्चम्यां तृतीयासप्तम्योरमभावे | अव्ययस्वरूपावबोधः, निर्धारितानामव्ययशब्दानाम् अर्थावबोधः, ससूत्रमव्ययानां पदत्वसाधनविधेरवबोधः, निर्दिष्टसूत्र-कारिकाणां सोदाहरणमर्थस्य प्रयोगे समन्वयनप्रकारस्य | अव्ययस्वरूपनिर्वचनम् अव्ययशब्दानामर्थनिदर्शनम्, अव्ययपदानां वाक्यानुच्छेदयोः प्रयोगकौशलप्रदर्शनम् अव्ययशब्दानां ससूत्रं पदत्वसाधनविधेः कथनम् | १० |

| | | | | | |
|---|---|---|---|---|---|
| | | चादन्तपुंलिङ्गवद्रूपाणां निष्पादनम्, अव्ययपदघटितानि वाक्यानि<br>● अव्ययादाप्सुपः इत्यत्र आब्ग्रहणस्य व्यर्थत्वप्रतिपादनम्<br>● सदृशं त्रिषु... वष्टि भागुरिः... इति कारिके<br>● सूत्र-कारिकाणां सोदाहरणमर्थापनं शङ्कोपशङ्कासमाधानञ्च मध्यसिद्धान्तकौमुद्या अव्ययप्रकरणस्था विषयाः । | चावबोधः । | निर्दिष्टसूत्रकारिकाणां सोदाहरणमर्थापनम् । | |
| | | | | | |
| सैद्धान्तिकाभ्यासः | | | | | ४८ |
| प्रयोगाभ्यासः | | | | | १६ |
| योगः | | | | | ६४ |

**न्यायखण्डः (कवर्गे व्याकरणविषयमवलम्ब्याधीयानां छात्राणां कृते)**

| क्र. सं. | विषयक्षेत्राणि | विषयाः | बोधः | प्रयोगः | कार्य घण्टाः |
|---|---|---|---|---|---|
| १. | न्यायवैशेषिकशास्त्रयोः प्रथिताः केचन पारिभाषिकशब्दाः विशेषतस्तर्कसंग्रहस्यानुमानखण्डात् समाप्तिपर्यन्तभागेषु प्रयुक्ताः पारिभाषिकशब्दाः । | पक्षः, साध्यम्, हेतुः, दृष्टान्तः, पक्षतावच्छेदकधर्मः, साध्यतावच्छेदकधर्मसंबन्धौ, हेतुतावच्छेदकधर्मसंबन्धौ, व्याप्तिः, पक्षता, परामर्शः, व्याप्यत्वम्, व्यापकत्वम्, लिङ्गम्, अन्वयः, व्यतिरेकः, सपक्षः, विपक्षः, प्रतियोगिता, अनुयोगितादयःपारिभाषिकशब्दाः । | पक्ष-साध्य-हेतु-दृष्टान्त-पक्षतावच्छेदकधर्म-साध्यतावच्छेदकधर्मसंबन्ध-हेतुतावच्छेदकधर्म-संबन्ध-व्याप्ति-पक्षता-परामर्श-व्याप्यत्व-व्यापकत्व-लिङ्ग-अन्वय-व्यतिरेक-सपक्ष-विपक्ष-प्रतियोगिता-अनुयोगितादिशब्दानामर्थबोधः । | पक्ष-साध्य- हेतु-दृष्टान्त-पक्षतावच्छेदकधर्म-साध्यतावच्छेदकधर्मसंबन्ध-हेतुतावच्छेदकधर्म-संबन्ध-व्याप्ति-पक्षता-परामर्श-व्याप्यत्व-व्यापकत्व-लिङ्ग-अन्वय-व्यतिरेक-सपक्ष-विपक्ष-प्रतियोगिता-अनुयोगितादिशब्दानामुदाहरणसहितवाक्येषु प्रयोगः । | ६ |
| २ | अनुमानप्रमाणम् । | अनुमानलक्षणम्,अनुमितिस्वरूपम्, परामर्शस्वरूपम्, व्याप्तिलक्षणम्, | अनुमानलक्षणबोधः, अनुमितिस्वरूपज्ञानम्, | अनुमानस्वरूपाभिव्यक्तिः, अनुमितिस्वरूपनिरूपणम्, | १३ |

| | | | | | |
|---|---|---|---|---|---|
| | | पक्षधर्मतापरिचयः, स्वार्थानुमानम्, परार्थानुमानम्, पञ्चावयववाक्यानि, त्रिविधलिङ्गम्, सपक्षः, विपक्षः । | परामर्शरूपबोधः, व्याप्तिस्वरूपज्ञानम्, पक्षधर्मतावबोधः, स्वार्थानुमानबोधः, परार्थानुमानबोधः, पञ्चावयववाक्यार्थावबोधः, त्रिविधलिङ्गस्वरूपज्ञानम्, सपक्षस्वरूपबोधः, विपक्षस्वरूपबोधः । | परामर्शस्वरूपकथनम्, व्याप्तिस्वरूपविचारः, पक्षधर्मतास्वरूपकथनम्, स्वार्थानुमाननिर्वचनम्, परार्थानुमाननिर्वचनम्, पञ्चावयववाक्यनिरूपणम्, त्रिविधलिङ्गस्वरूपप्रतिपादनम्, सपक्षस्वरूपकथनम्, विपक्षस्वरूपप्रतिपादनम् । | |
| ३ | हेत्वाभासः | हेत्वाभासनिरूपणप्रयोजनम्, हेत्वाभासलक्षणम्, हेत्वाभासभेदाः, सव्यभिचारः, विरुद्धः, सत्प्रतिपक्षः, असिद्धः, बाधितः । | हेत्वाभासनिरूपणप्रयोजनज्ञानम्, हेत्वाभासलक्षणज्ञानम्, हेत्वाभासभेदज्ञानम्, सोदाहरणसव्यभिचारस्वरूपज्ञानम्, उदाहरणसहितविरुद्धहेत्वाभासबोधः, सत्प्रतिपक्षस्वरूपज्ञानम्, सभेदासिद्धहेत्वाभासबोधः, सोदाहरणं बाधितहेत्वाभासज्ञानम् । | हेत्वाभासनिरूपणप्रयोजननिर्वचनम्, हेत्वाभासलक्षणनिरूपणम्, हेत्वाभासभेदनिर्वचनम्, सोदाहरणसव्यभिचारस्वरूपप्रतिपादनम्, उदाहरणसहितविरुद्धहेत्वाभासस्य स्वरूपनिर्वचनम्, उदाहरणप्रदर्शनपूर्वकं सत्प्रतिपक्षस्वरूपनिरूपणम्, भेदप्रदर्शनपूर्वकासिद्धहेत्वाभासनिरूपणम्, उदाहरणसहितबाधितहेत्वाभासनिरूपणम् । | ८ |
| ४ | उपमानप्रमाणम् शब्दप्रमाणञ्च | उपमानप्रमाणम्, उपमितिः, शब्दप्रमाणम् | उपमानप्रमाणबोधः, उपमितिप्रमायाः प्रकारबोधः, शब्दप्रमाणज्ञानम् | सोदाहरणमुपमानप्रमाणकथनम्, उपमितिप्रमायाः प्रकारनिर्वचनम्, शब्दप्रमाणाभिव्यक्तिः | ८ |

| | | | | | |
|---|---|---|---|---|---|
| | | शक्तिलक्षणाख्यवृत्तिः<br>शाब्दबोधकारणानि<br>शाब्दस्व–रूपम्<br>शब्दप्रमाणभेदः | शक्तिलक्षणाख्यवृत्तिज्ञानम्<br>शाब्दबोधकारणबोधः<br>शाब्दस्वरूपज्ञानम्<br>शब्दप्रमाणभेदबोधः | शक्तिलक्षणाख्यवृत्तिनिरूपणम्<br>शाब्दबोधकारणनिर्धारणम्<br>शाब्दस्वरूपनिरूपणम्<br>शब्दप्रमाणभेदप्रतिपादनम् | |
| ५. | अयथार्थानुभवः,<br>सुखादिगुणाः,<br>कर्मादिपदार्थाश्च | संशयविपर्ययतर्काः,स्मृतिः,<br>सुखदुःखे, शेषात्मगुणाः,<br>सभेदसंस्कारः,<br>सामान्यलक्षणम्,<br>विशेषः,<br>समवायःसभेदाभावः,सर्वपदार्थानां<br>सप्तस्वन्तर्भावः | संशयविपर्ययतर्काणां स्वरूपबोधः,<br>स्मृतिज्ञानम्,<br>सुखदुःखयोस्वरूपज्ञानम्,<br>शेषात्मगुणबोधः,<br>सभेदसंस्कारपरिज्ञानम्,<br>सामान्यलक्षणज्ञानम्,<br>विशेषबोधः<br>समवायज्ञानम्<br>सभेदाभावबोधः,<br>सर्वपदार्थानां सप्तस्वन्तर्भावज्ञानम् | संशयविपर्ययतर्काणां स्वरूपपरिचयः,<br>स्मृतिनिरूपणम्,<br>सुखदुःखयोस्वरूपाभिव्यक्तिः,<br>शेषात्मगुणनिरूपणम्,सभेदसंस्कारनिर्वचनम्<br>,सामान्यलक्षणकरणम्, विशेषनिरूपणम्,<br>समवायप्रतिपादनम्म्<br>सभेदाभावकथनम्,<br>सर्वपदार्थानां सप्तस्वन्तर्भावकथनम् | १३ |
| सैद्धान्तिकाभ्यासः | | | | | ४८ |
| प्रयोगाभ्यासः | | | | | १६ |
| योगः | | | | | ६४ |

**५. प्रयोगात्मककार्यं परियोजनाकार्यञ्च**

| **क्र.सं.** | **क्षेत्रम्** | **परीक्षणीयाः पक्षाः** | **अङ्कभारः** | **मूल्याङ्कनाधाराः** |
|---|---|---|---|---|
| १. | शिक्षण-<br>सहभागिता | (क) उपस्थितिः<br>(ख) सहभागिता | ३ | ➢ विद्यार्थिनां दैनिकोपस्थितेरभिलेखः<br>➢ भाषिकशिल्पविकासाय वैयक्तिक-युगल-समूहगतादि-कक्षागतशिक्षणसहभागिता |
| २. | कक्षाकार्यं | कक्षाकार्यं | ६ | ➢ व्याकरणस्य विषयवस्तूनां ज्ञानार्जने सामूहिकविमर्श-मौखिकपरीक्षा-प्रश्नोत्तरण-कक्षाकार्यपरीक्षण- |

| | | | | |
|---|---|---|---|---|
| | परियोजना-कार्यं वा | परियोजनाकार्यं वा | | भाषिकव्यवहारे सिद्धरूपाणां प्रयोगचातुर्यादिकार्येषु सहभागिता<br>➢ न्यायविषयसम्बद्ध-विषयवस्तूनां ज्ञानार्जने पारिभाषिकपदानां परिचयप्रदानपूर्वकं तेषां प्रयोगेण मौलिकवाक्यनिर्माणार्थविवेचन-प्रयोग-विश्लेषण-तत्त्वबोधादिकार्येषु सहभागिता<br>➢ श्रवण-भाषण-पठन-लेखनशिल्पविकास-सम्बद्धा लिखिता मौखिकी च प्रस्तुतिः<br>➢ गृहकार्यं कक्षाकार्यं वा<br>➢ विषयवस्तुसम्बद्ध-परियोजनाकार्यस्य प्रतिवेदनमन्तर्वार्ता च |
| ३. | विषयवस्तुगतं मूल्याङ्कनम् | (क) बोधः | ५ | ➢ रेडियो-क्यासेट-मोबाइल-नामधेयानामन्येषां वैद्युतोपकरणानां वा माध्यमेन संवाद-समाचार-साहित्यिकाभिव्यक्तिः<br>➢ श्रुतिलेखनम्<br>➢ सन्देशमूलकगद्यांशं श्रावयित्वा अनुमान-पूर्वानुमान-प्रश्नोत्तर-शब्दबोधार्थबोध-भावबोध-सन्दर्भबोध-कथाकथन-घटनावर्णन-मुख्यसूत्रीकरणसम्बद्धान् प्रश्नान् पृष्ट्वा उत्तरकथनं लेखनञ्च<br>➢ विषयवस्तूनामाधारेण अनुमान-पूर्वानुमान-प्रश्नोत्तर-शब्दबोधार्थबोध-भावबोध-सन्दर्भबोध-कथाकथन-घटनावर्णन-मुख्यसूत्रीकरणसम्बद्धान् प्रश्नान् पृष्ट्वा उत्तरकथनं लेखनञ्च<br>➢ विद्यार्थिषु पाठ्यवस्तुबोधः, सूत्राणां शुद्धोच्चारणम्, शुद्धलेखनम्, सूत्रवार्तिकार्थापनम्, आवश्यकतानुसारेण गणसूत्र-वार्तिक-परिभाषा-न्याय-कारिकादीनामुपयोगप्रभृतिविषयाणामभ्यासः, रूपावलिप्रदर्शनम्, सिद्धरूपाणां वाक्येषु समुचितप्रयोगः |
| | | (ख) अभिव्यक्तिः | ५ | ➢ किञ्चिद्विषयवस्तु, चित्रं परिवेशादिकं निर्दिश्य मौखिकवर्णनम् । तत्र क्रमे वक्त्रा स्वाभिव्यक्तौ स्पष्टता-शैली-भाषिकस्तर-शुद्धोच्चारण-गति-यति-लयाभिनयप्रभृतिपक्षेषु ध्यानं देयम्<br>➢ कथां श्रुत्वा कथाकथने घटनापात्रपरिवेशादिवर्णने प्रवर्तनम्<br>➢ पत्रपत्रिकाभ्योऽन्यलिखितसामग्रीभ्यो वा शब्दात्मकं गद्यांशं पद्यांशं वा निर्दिश्य गति-यति-लयानुकूल्येन भावानुकूल्येन च सस्वरवाचने प्रवर्तनम् । वाचनक्रमे वक्त्रा स्वाभिव्यक्तौ स्पष्टता-शैली-भाषिकस्तर-शुद्धोच्चारण-गति-यति-लयाभिनयप्रभृतिपक्षेषु विशेषतोऽवदानमपेक्षितम्<br>➢ रूपावलिप्रदर्शनम्, सूत्रार्थसमन्वयपूर्वकं रूपसिद्धिप्रक्रियाबोधनम्, सिद्धरूपाणां वाक्येषु |

| | | | | |
|---|---|---|---|---|
| | | | | प्रयोगप्रदर्शनम्, प्रतिप्रकरणगताया रूपसिद्धि-प्रक्रियायाः पार्थक्यबोधनम्<br>अथवा<br>➢ प्रकरणगतेषु विषयेषु व्याप्तिलक्षणोपस्थापनम्, लक्ष्ये लक्षण-समन्वयप्रदर्शनम्, अव्याप्त्यादिदोषोद्भावनम्, तदपाकरणम्, लक्षण-परिष्कारः, प्रथमलक्षणपरित्यागकारण-प्रदर्शनम् द्वितीयादिलक्षण-विचारश्च |
| ४. | त्रैमासिकपरीक्षा | मौखिकं लिखितं वा | ६ | त्रैमासिकपरीक्षायाः प्राप्ताङ्कस्यानुपातिकप्रतिशताधारेणाङ्कनिर्धारणं कर्तव्यम् |
| योगः | | | २५ | |

**६. शिक्षणसहजीकरणप्रक्रिया**

संस्कृतभाषाध्ययनमाध्यमेन विद्यार्थिनां भाषाव्याकरणयोर्विविधपक्षाणां संस्कृतसम्बद्धविषयाणां वा ज्ञानेन सह सच्चरित्रवतां नैतिकतायुतानां च नागरिकाणां निर्माणमस्य विषयस्योद्देश्यं विद्यते । एतस्मिन् समाविष्टानां विषयवस्तुनामध्यापनक्रमे सर्वेभ्यः क्षेत्रभ्यः समानं महत्त्वं प्रदातव्यं भवति । सम्बद्धविषयवस्तुनः सहजीकरणपूवर्कं ज्ञानशिल्पधारणानां विकासनमावश्यकम् । विद्यार्थिषु सैद्धान्तिकपक्षेण सह व्यावहारिकपक्षञ्च विकासस्यानुकूलचिन्तनव्यवहारयोः समुन्नयनमेतस्य विषयस्य मुख्योद्देश्यं निर्धारितं वर्तते ।

संस्कृतभाषाव्याकरणशिक्षणोपक्रमे भाषिकशिल्पस्य विकासायापरिहार्यतया अध्ययनसहजीकरणमपेक्षते । भाषाव्याकरणस्य शिक्षणविधौ विद्यार्थिकेन्द्रिताः क्रियाकलापा अवलम्बनीया भवन्ति । सहजीकरणं च छात्रपृष्ठभूमि-पाठ्यक्रमोद्देश्य-पाठ्यविषयान् अवलम्बते । वैयक्तिकं सामूहिकं चाभ्यासं समाश्रित्य शिक्षणसहजीकरणं सम्पद्यते । अधो लिखिता अध्ययनसहजीकरण-शिक्षणक्रियाकलापा अस्य पाठ्यक्रमस्य उद्देश्यसिद्धये उपादानानि भवन्ति -

१. **विषयाणां (विधानां) माध्यमेन शिल्पानां शिक्षणम्** - गद्यपद्यरूपकव्यावहारिकलेखनरूपाणां शिल्पविकासस्य साधनानामवलम्बनम् ।

२. **शिल्पाश्रितं शिक्षणम्** - भाषिकशिल्पस्य विकासाय भाषायाः श्रवण-भाषण-पठन-लेखनरूपाणां चतुर्णामेव शिल्पानामेकीकृतशिक्षणम् ।

३. **अभ्यासप्रधानाः सर्जनात्मकाश्च क्रियाकलापाः** - भाषिकशिल्पचतुष्टयस्य विकासाय अधो लिखितानामभ्यासप्रधानानां सर्जनात्मकानाञ्च क्रियाकलापानां सम्पादनमावश्यकं भवति -

(क) प्रस्तुतीकरणम् (ख) अभ्यासः (ग) उत्पादनम् (घ) पठनबोधः (ङ)प्रयोगात्मककार्यम् (च) पृष्ठपोषणम् (छ) आत्ममूल्याङ्कनम्

४. बहुविधक्षमतायाः स्तराणाञ्चानुसारेण शिक्षणम्
५. सदसद्विवेकविकासः
६. सहकार्यप्रधानशिक्षणम्
७. सामूहिकमूल्याङ्कनापेक्षि शिक्षणम्

**शिक्षणप्रक्रियायाः सम्भाव्याः शिल्पगतसंयुक्तक्रियाकलापाः**

**(क) श्रवणशिक्षणस्य**

- शुद्धमशुद्धञ्चोच्चारणं संश्राव्य विद्यार्थिभ्यः शुद्धोच्चारणं निर्णेतुं निर्देशनम्
- गद्यपद्ययोः प्रेरकसन्दर्भं श्रावयित्वा तस्य पुनरावृत्तिं कर्तुमभिप्रेरणम्
- सामयिकीं घटनां संश्राव्य तस्याः प्रभाववर्णनाय निर्देशनम्
- सूत्रवार्तिककारिकाणां शुद्धस्वरूपं श्रावयित्वा तेषां पुनरावृत्त्यर्थमभिप्रेरणम् ।

**(ख) सम्भाषणशिक्षणस्य**

- पद्यानां गति-यति-लयसौष्ठवस्य कथनाय विद्यार्थिभ्योऽभिप्रेरणम्
- परिज्ञातविषयाणां सारांशं वक्तुं निर्देशनम्
- कथा-जीवनी-प्रबन्धानां पार्थक्यस्य स्पष्टीकरणाय निर्देशनम्
- काल-वचन-पुरुषनिदर्शनपूर्वकं निष्पन्नतिङन्तपदोच्चारणाय प्रेरणम्
- समासानुकूल्येन समुचितलौकिकविग्रहवाक्योच्चारणे प्रवर्तनम्
- कृदन्त-तद्धितान्तपदानां प्रकृतिप्रत्यययोर्विश्लेषणं विधाय निष्पन्नरूपोच्चारणायाभिप्रेरणम् ।

**(ग) पठनशिक्षणस्य**

- समस्तपदानि सङ्केत्य पाठांशपठनाय उत्प्रेरणम्
- अधीतानुच्छेदस्य मूलसूत्राणि निर्णीय पठनाय निर्देशनम्
- पद्यानि एकाकिना समूहेन च पठितुं निर्देशनम्
- सूत्र-वार्तिक-कारिकाणामेकाकिना समूहगतरूपेण च पठनायोत्प्रेरणम्
- समस्तव्यस्तप्रयोगाणां पार्थक्यबोधनपूर्वकं प्रयोगायाभिप्रेरणञ्च ।

**(घ) लेखनशिक्षणस्य**

- पाठ्यवस्तूनां बोधप्रश्नोत्तरं लेखितुं प्रेरणम्
- पद्यस्य गद्ये रूपान्तरणपूर्वकं लेखनाय निर्देशनम्
- अशुद्धमनुच्छेदं संशोध्य पुनर्लेखितुमभिप्रेरणम्
- सूत्र-वार्तिक-कारिकाणां शुद्धलेखनाय प्रवर्तनम्,
- तिङन्त-कृदन्त-तद्धितान्तरूपसिद्धिप्रक्रियायाः क्रमबद्धलेखनायाभिप्रेरणम्
- कारकीयनियमानुसारेण शुद्धलेखनाय निर्देशनम्
- समस्तपदानां साधुत्वप्रक्रियालेखनायोत्प्रेरणञ्च ।

## ७. विद्यार्थिमूल्याङ्कनप्रक्रिया

विद्यार्थिनां शिक्षणोपलब्धिं सुनिश्चेतुं निर्माणात्मकं निर्णयात्मकञ्चोभयप्रकारकमेव मूल्याङ्कनं विधातव्यं भवति । विद्यार्थिनां शिक्षणोपलब्धेः सुधाराय कक्षाशिक्षणस्यैव क्रमे कक्षाकार्य-परियोजनाकार्य-प्रस्तुतीकरणोपलब्धिपरीक्षासदृशान् क्रियाकलपान् कारयित्वा सैद्धान्तिकज्ञानशिल्पयोरवाप्तिरावश्यकी । एतत्कार्यस्य प्रभावकारिरूपेण क्रियान्वयनाय, विद्यार्थिनां शिक्षणस्तरस्य सुधाराय च सहजीकरणक्रियाकलापस्य अभिन्नाङ्गस्य रूपेण निर्माणात्मकमूल्याङ्कनमुपयोक्तव्यम् । निर्माणात्मकमूल्याङ्कनस्य शिक्षणोपलब्धेर्निश्चिताङ्काः निर्णयात्मकमूल्याङ्कनेऽपि संयोज्यन्ते ।

पाठ्यक्रमेण निर्धारितस्योद्देश्यस्यानुरूपं विद्यार्थिनो ज्ञान-शिल्पाभिवृत्तीः प्राप्नुवन्न वेति विषयस्यान्वेषकं महत्त्वपूर्णं संयन्त्रं मूल्याङ्कनं भवति । विद्यार्थिनां मूल्याङ्कनं सक्षमतानां शिक्षणोपलब्धीनां च विचारेण

शिक्षणस्य सर्वेषां स्तराणां समावेशेन च विधातव्यम् । अस्य विषयस्य आन्तरं बाह्यं च मूल्याङ्कनं विधीयते । अत्र प्रतिशतं पञ्चविंशतिरङ्काः आन्तरमूल्याङ्कने पञ्चसप्ततिरङ्काश्च बाह्यमूल्याङ्कने उपयुज्यन्ते । बाह्यमूल्याङ्कनाय लिखितपरीक्षा सञ्चाल्यते । विद्यार्थीमूल्याङ्कनस्यान्तर्गतं निर्माणात्मकं निर्णयात्मकञ्च मूल्याङ्कनं पद्धतिद्वयेनैव क्रियते । अस्य विषयस्य पाठ्यक्रमे समाविष्टानां स्तरगतसक्षमतानाम्, कक्षागतशिक्षणेपलब्धीनाम्, तासां विषयवस्तूनाम्, तैस्सह सम्बद्धस्य शिल्पस्य, शिक्षण सहभागितायाः शिक्षणसक्रियतायाश्चाधारेषु विद्यार्थिनां शिक्षणस्य मूल्याङ्कनं विधातव्यम् ।
अस्य स्तरस्य विद्यार्थिनां मूल्याङ्कनमक्षराङ्कनपद्धत्या विधीयते । मूल्याङ्कने निर्माणात्मिका निर्णयात्मिका च प्रक्रिया अवलम्ब्यते । छात्राणां स्तरगतसामर्थ्योपलब्धये विधातव्यैरध्ययनभ्रमण-घटनावलोकन-सर्जनकार्य-वैयक्तिकसामूहिकविमर्शन-लिखितपरीक्षा-प्रत्युत्पन्नमतिप्रदर्शन-प्रश्नोत्तरण-कक्षाकार्यपरीक्षण-भाषिकव्यवहारप्रभृति-कार्यै-र्निर्माणात्मकं मूल्याङ्कनं विधीयते येन अविच्छिन्नं मूल्याङ्कनं सम्पद्यते । स्तरगतसामर्थ्योपलब्धये कक्षागतसामर्थ्योपलब्धये च शैक्षिकसत्रस्यान्तेऽन्तिमपरीक्षाया माध्यमेन निर्णयात्मकमूल्याङ्कनं सम्पाद्यते । विद्यार्थिषु पाठ्यवस्तुबोधादर्शचरित्रनिर्माण-मानवीयमूल्यावलम्बन-पर्यावरणसंरक्षण-भाषिकशिल्पार्जनप्रभृतिविषयाणां विकासो मूल्याङ्कनस्य मूलाधारो मन्यते ।
मूल्याङ्कनप्रक्रियां विश्वसनीयां विधिसम्मताञ्च सम्पाद्य एकरूपतायै स्थानीय-प्रादेशिक-राष्ट्रियस्तरेषु बाह्यसार्वजनिकपरीक्षणविधौ सर्वेषु विषयेषु आन्तरं बाह्यं च मूल्याङ्कनं विधीयते । सार्वजनिकपरीक्षणे प्रतिविषयं प्रतिशतं पञ्चविंशत्यङ्कानां कृते आन्तरं परीक्षणम्, प्रतिशतं पञ्चसप्तत्यङ्कानां कृते बाह्यं परीक्षणञ्च विधीयते । आन्तरं मूल्याङ्कनं सम्बद्धविद्यालयस्य शिक्षकेण विधातव्यम् । शिक्षणप्रक्रियया सहैव विषयवस्तुसम्बद्धं मूल्याङ्कनं नैरन्तर्येण विधेयम् । तत्र शिक्षणोपलब्धिः क्रमशः औपचारिकरूपेण अनौपचारिकरूपेण च परिमापनीया । शिक्षणसहजीकरणस्य क्रमे विद्यार्थिभिरधिगतानां ज्ञानशिल्पप्रयोगोच्चदक्षतासम्बद्धपक्षाणां मूल्याङ्कनञ्च अनिवार्यतया विधेयम् ।

**(क) आन्तरं मूल्याङ्कनम्**

शिक्षणसहजीकरणप्रक्रियया कक्षागतशिक्षणेन सहैव छात्राणामान्तरं निर्माणात्मकं वा मूल्याङ्कनमपि कर्तव्यम् । संस्कृतभाषायाः व्याकरणस्य च शिक्षणक्रमे छात्राणां निर्माणात्मकमूल्याङ्कनाय अधोऽङ्किता विधयोऽवलम्बयितुं शक्यन्ते-

- लिखितप्रश्नोत्तरमाध्यमेन
- मौखिकप्रश्नोत्तरमाध्यमेन
- छात्राणां परस्परविचारविमर्शमाध्यमेन

अत्र क्रमे कक्षाध्यापकेन विधागतलेखनाय सिर्जनात्मकलेखनाय च प्रेरणम्, सूत्रोच्चारणाय सूत्रार्थापनाय च प्रेरणम्, सूत्रार्थावबोधनम्, उदाहरणेषु सूत्रप्रवर्तननिदर्शनम्, उदाहरणेषु प्रत्युदाहरणेषु च पार्थक्यबोधनाय प्रश्नोत्तराणि, सामूहिकी चर्चा, समूहविभाजनं कृत्वा समस्यायाः समाधानम्, नवीनोदाहरणचयनाभ्यासः, रूपावलिसञ्चालनाय कथनम्, रूपसिद्धिप्रक्रियालेखनाय प्रेरणम्, समासे लौकिकालौकिकविग्रहप्रदर्शनाय कथनम्, तिङन्ते समानप्रकृतिकानां धातूनां रूपावलिसञ्चालनाय प्रेरणादिकं कार्यम् ।

अधो लिखिताधारेणान्तरमूल्याङ्कनं कर्तव्यम् :

| क्र.सं. | क्षेत्रम् | अङ्कभारः |
|---|---|---|
| १. | शिक्षणसहभागिता | ३ |
| २. | कक्षाकार्यं परियोजनाकार्यं वा | ६ |
| ३. | विषयवस्तुगतं मूल्याङ्कनम् | १० |
| ४. | त्रैमासिकपरीक्षा | ६ |
| योगः | | २५ |

**(ख) बाह्यमूल्याङ्कनम्**

निर्णयात्मके बाह्ये वा मूल्याङ्कने पाठ्यक्रमे निर्धारितोद्देश्यानुरूपं छात्रैः ज्ञानम्, शिल्पञ्चाधिगन्तव्यं । तदधिगतं न वेति सम्परीक्ष्य तदनुसारेण छात्राणामुत्तीर्णत्वमनुत्तीर्णत्वं वा निर्णीयते । एतादृशं मूल्याङ्कनमावधिकं भवति । शैक्षिकसत्रस्यान्त एतद् मूल्याङ्कनं विधीयते ।

अधोलिखिताधारेण बाह्यमूल्याङ्कनं कर्तव्यम् :

**कक्षा ९**

| **क्र.सं** | **विषयक्षेत्रगतस्वरूपम्** | **विषयक्षेत्रम्** | **अङ्कभारः** |
|---|---|---|---|
| १. | पठनबोधः, अनुच्छेदबोधः | गद्यम् (कथा/प्रबन्धः) | ३ |
| | मर्मप्रकाशनम्, कथायाः विस्तरणम्, विषयवस्तूनां विश्लेषणम् | गद्यम् (कथा/प्रबन्धः) | ५ |
| | | | |
| | कथानुच्छेदरचना | गद्यम् (कथा/प्रबन्धः) | ५ |
| | पठनबोधः, अनुच्छेदबोधः | गद्यम् (जीवनवृत्तम्/संवादः/वक्तृता) | २ |
| | जीवनवृत्तसंवादवक्तृतालेखनक्रमस्य बोधः,<br>तथ्याङ्कबोधः, अनुच्छेदबोधः | गद्यम् (जीवनवृत्तम्/संवादः/वक्तृता) | ४ |
| | मर्मप्रकाशनम्, तथ्याङ्कस्य विस्तरणम्, विषयवस्तूनां विश्लेषणम्, प्रदत्तसूचनाधारेण जीवनवृत्तसंवादवक्तृतालेखनम् | गद्यम् (कथा/प्रबन्धः/जीवनवृत्तम्/संवादः/वक्तृता) | ३ |
| २. | अन्वयार्थज्ञानम्, पद्यवस्तुबोधः, विषयवस्तूनां सन्दर्भबोधः | पद्यम् (स्तुतिपद्यम्/नीतिपद्यम्/महाकाव्यांशः) | ४ |
| | मर्मप्रकाशनम्, विषयवस्तूनां विश्लेषणम्, प्रवचनम्, वस्तुवर्णनम् | पद्यम् (स्तुतिपद्यम्/नीतिपद्यम्/महाकाव्यांशः) | ३ |
| | अन्वयार्थज्ञानम्, पद्यवस्तुबोधः, विषयवस्तूनां सन्दर्भबोधः | पद्यम् (स्तुतिपद्यम्/नीतिपद्यम्/महाकाव्यांशः) | २ |
| | पद्यस्य वस्तुविमर्शनं मूल्याङ्कनञ्च, | पद्यम् (स्तुतिपद्यम्/नीतिपद्यम्/महाकाव्यांशः) | ६ |

| | | | |
|---|---|---|---|
| | सम्बद्धानुच्छेदस्य सूत्राणि निर्माय सङ्क्षेपीकरणम् | | |
| योगः | | | ३७ |

कवर्गे नव्यव्याकरणेतरविषयमवलम्ब्य अधीयानानां छात्राणां कृते

| | | | |
|---|---|---|---|
| १. | निर्धारितानां विषयवस्तूनां परिचयः, अर्थनिर्धारणम्, सूत्रलेखनं प्रदर्शनञ्च, | संज्ञाप्रकरणम्/पञ्चसन्धिः | ५ |
| | सन्धिकरणम्, सन्धिविच्छेदः, सूत्रार्थप्रकाशनम् | संज्ञाप्रकरणम्/पञ्चसन्धिः | ५ |
| | सूत्रार्थसङ्घटनपूर्विका-स्थितिनिदर्शनपूर्विका च साधुत्वप्रक्रिया | संज्ञाप्रकरणम्/पञ्चसन्धिः | ८ |
| २. | निर्धारितानां विषयवस्तूनां परिचयः, अर्थनिर्धारणम्, सूत्रलेखनं प्रदर्शनञ्च, रूपावलिलेखनम् | अजन्तप्रकरणम् | ४ |
| | साधितानां सुबन्तपदानां यथायथं वाक्य -प्रयोगनिर्धारणम्, प्रदत्तानां सूत्राणामर्थविवेचनम्, | अजन्तप्रकरणम् | ६ |
| | सूत्रार्थसङ्घटनपूर्विका-स्थितिनिदर्शनपूर्विका च शब्दसाधुत्वप्रक्रिया | अजन्तप्रकरणम् | १० |
| योगः | | | ३८ |

कवर्गे नव्यव्याकरणविषयमवलम्ब्य अधीयानानां छात्राणां कृते व्याकरणस्थाने निम्नानुसारेण न्यायविषयस्य मूल्याङ्कनं भवेत् :

| **क्र.सं** | **विषयक्षेत्रगतस्वरूपम्** | **विषयक्षेत्रम्** | **अङ्कभारः** |
|---|---|---|---|
| १. | न्यायवैशेषिकशास्त्रयोः प्रथिताः पारिभाषिकशब्दाः | परिभाषाप्रकरणम् | ५ |
| २. | वैशेषिकशास्त्राभिमतपदार्थोद्देशः, मनोऽन्तद्रव्यपदार्थाश्च | पदार्थप्रकरणम् द्रव्यप्रकरणम् | ९ |
| ३. | शब्दान्तगुणाः | गुणप्रकरणम् | ९ |
| ४. | बुद्धिः, बुद्धिभेदाः, कारणम्, कारणभेदाश्च | गुणप्रकरणम् | ५ |
| ५. | प्रत्यक्षप्रमाणम्, प्रत्यक्षप्रमा च | साधर्म्यवैधर्म्यपरिचयः | १० |
| योगः | | | ३८ |

**कक्षा १०**

| क्र.सं | विषयक्षेत्रगतस्वरूपम् | विषयक्षेत्रम् | अङ्कभारः |
|---|---|---|---|
| १. | पठनबोधः, अनुच्छेदबोधः | गद्यम् (कथा/प्रबन्धः) | ३ |
| | मर्मप्रकाशनम्, कथायाः विस्तरणम्, विषयवस्तूनां विश्लेषणम् | गद्यम् (कथा/प्रबन्धः) | ५ |
| | | | |
| | कथानुच्छेदरचना | गद्यम् (कथा/प्रबन्धः) | ५ |
| | पठनबोधः, अनुच्छेदबोधः | गद्यम् (जीवनवृत्तम्/रूपकम्/प्रवचनम्) | २ |
| | जीवनवृत्तसंवादवक्तृतालेखनक्रमस्य बोधः, तथ्याङ्कबोधः, अनुच्छेदबोधः | गद्यम् (जीवनवृत्तम्/रूपकम्/प्रवचनम्) | ४ |
| | मर्मप्रकाशनम्, तथ्याङ्कस्य विस्तरणम्, विषयवस्तूनां विश्लेषणम्, प्रदत्तसूचनाधारेण जीवनवृत्तसंवादवक्तृतालेखनलेखनम् | गद्यम् (जीवनवृत्तम्/रूपकम्/प्रवचनम्) | ३ |
| | अन्वयार्थज्ञानम्, पद्यवस्तुबोधः, विषयवस्तूनां सन्दर्भबोधः | पद्यम् ( स्तुतिपद्यम्/दार्शनिकपद्यम्/महाकाव्यांशः) | ४ |
| २. | मर्मप्रकाशनम्, विषयवस्तूनां विश्लेषणम्, प्रवाचनम्, वस्तुवर्णनम् | पद्यम् ( स्तुतिपद्यम्/दार्शनिकपद्यम्/महाकाव्यांशः) | ३ |
| | अन्वयार्थज्ञानम्, पद्यवस्तुबोधः, विषयवस्तूनां सन्दर्भबोधः | पद्यम् ( स्तुतिपद्यम्/दार्शनिकपद्यम्/महाकाव्यांशः) | २ |
| योगः | | | ३७ |

कवर्गे नव्यव्याकरणेतरविषयमवलम्ब्य अधीयानानां छात्राणां कृते

| | | | |
|---|---|---|---|
| १. | निर्धारितानां विषयवस्तूनां परिचयः, अर्थनिर्धारणम्, सूत्रलेखनं प्रदर्शनञ्च, | हलन्तप्रकरणम् | ४ |
| | साधितानां सुबन्तपदानां यथायथं वाक्य - प्रयोगनिर्धारणम्, प्रदत्तानां सूत्राणामर्थविवेचनम्, | हलन्तप्रकरणम् | १० |

| | | | |
|---|---|---|---|
| | सूत्रार्थसङ्घटनपूर्विका-स्थितिनिदर्शनपूर्विका च साधुत्वप्रक्रिया | हलन्तप्रकरणम् | १६ |
| २. | निर्धारितानां विषयवस्तूनां परिचयः, अर्थनिर्धारणम्, सूत्रलेखनं प्रदर्शनञ्च, रूपावलिलेखनम् | अव्ययप्रकरणम् | ३ |
| | अव्ययपदानां यथायथम् अर्थनिर्धारणेन वाक्य -प्रयोगनिर्धारणम्, प्रदत्तानां सूत्राणामर्थविवेचनम्, | अव्ययप्रकरणम् | ५ |
| | | | |
| योगः | | | ३८ |

कवर्गे नव्यव्याकरणविषयमवलम्ब्य अधीयानानां छात्राणां कृते व्याकरणस्थाने निम्नानुसारेण न्यायविषयस्य मूल्याङ्कनं भवेत् :

| **क्र.सं** | **विषयक्षेत्रगतस्वरूपम्** | **विषयक्षेत्रम्** | **अङ्कभारः** |
|---|---|---|---|
| १ | न्यायवैशेषिकशास्त्रयोः प्रथिताः केचन पारिभाषिकशब्दाः विशेषतस्तर्कसंग्रहस्यानुमानखण्डात् समाप्तिपर्यन्तभागेषु प्रयुक्ताः पारिभाषिकशब्दाः । | परिभाषाप्रकरणम् | ४ |
| २. | अनुमानप्रमाणम् । | अनुमानप्रकरणम् | ७ |
| ३ | हेत्वाभासः | अनुमानप्रकरणम् | ७ |
| ४ | उपमानप्रमाणम् शब्दप्रमाणञ्च | उपमानशाब्दप्रकरणे | ६ |
| ५. | अयथार्थानुभवः, सुखादिगुणाः, कर्मादिपदार्थाश्च | शेषगुण-शेषपदार्थप्रकरणे | ६ |
| योगः | | | ३८ |

## विशिष्टीकरणतालिका

**कक्षा : १०** **पूर्णाङ्काः ७५**

**समयः घण्टात्रयम्**

| **क्र. स.** | **विषयक्षेत्रम् (पठनं लेखनञ्च)** | **प्रश्नप्रकृतिः** | **ज्ञानम्** (१×१=१) | | | **बोधः** (१×१=१) | | | **शिल्पम्** (१×५=५) | | | **उच्च- दक्षता** (१×८=८) | | | **प्रष्टव्याः प्रश्न सङ्ख्याः** | **अङ्क भारः** | **स्पष्टीकरणम्** |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | **क** | **ख** | **ग** | **क** | **ख** | **ग** | **क** | **ख** | **ग** | **क** | **ख** | **ग** | | | |
| १. | गद्यम् | ज्ञान-बोध-प्रयोगोच्च-दक्षतात्मकम् | १ | - | - | १ | - | - | - | १० | - | - | - | ८ | ८ | ३० | **ज्ञानबोध**क्षेत्रतः-<br>जीवनवृत्ततो ज्ञानसम्बद्ध एकः, रूपकतः कथातो वा बोधसम्बद्ध एकः प्रश्नः ।<br>**शिल्प**क्षेत्रतः-<br>वाक्यद्वयस्य संस्कृतान्नेपालिभाषायाम्, वाक्यत्रयस्य नेपालिभाषातः संस्कृतेऽनुवादसम्बद्ध एक प्रश्नः ।<br>**अथवा**<br>लिङ्ग-वचन-पुरुष-काल-वाच्य-कारक-विभक्तीराधृत्य यथानिर्देशमुत्तरदानसम्बद्ध उपप्रश्नपञ्चकात्मक एकः प्रश्नः ।<br>प्रबन्ध-जीवनवृत्त-रूपक-प्रवचनेभ्यो विषयवर्णनात्मक एकः प्रश्नः ।<br>**उच्चदक्षता**क्षेत्रतः-<br>कथातो विषयविवेचन-चरित्रवैशिष्ट्यप्रकाशन-कथासारलेखन-सन्देशप्रकाशनसम्बद्ध उपप्रश्नद्वयात्मक एकः प्रश्नः ।<br>**अथवा**<br>सूत्राधृतजीवनवृत्त-कथालेखनसम्बद्धो विषयाधृतप्रबन्धलेखनसम्बद्धो वा एकः प्रश्नः । |
| २. | पद्यम् | ज्ञान-बोध-प्रयोगोच्चदक्षतात्मकम् | १ | - | - | २ | - | - | - | ५ | - | - | - | ८ | ५ | १६ | **ज्ञानबोध**क्षेत्रतः-<br>निर्दिष्टच्छन्दसो लक्षणलेखनसम्बद्ध एकः, निर्दिष्टच्छन्दस उदाहरणलेखनसम्बद्ध एकः, नीतिपद्यतः पदस्य पर्याय-व्युत्पत्ति-सन्धिनिर्देश-सन्धिविधान-लिङ्गनिर्देशसम्बद्ध एकः प्रश्नः ।<br>**शिल्प**क्षेत्रतः-<br>निर्दिष्टपद्यस्यान्वय-सरलार्थ-भावार्थलेखन-प्रेरकपक्षसूत्रीकरणसम्बद्धोपप्रश्नद्वयात्मकः प्रदत्तपद्याधृतप्रश्नोत्तरणसम्बद्धो वा एकः प्रश्नः । |

| | | | | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | | | | | | | | | | | | | | | **उच्चदक्षता**क्षेत्रतः-<br>काव्य-दार्शनिकपद्यतः सप्रसङ्गव्याख्यालेखनसम्बद्ध एकः प्रश्नः । |
| ३. | व्याकरणम् | ज्ञान-बोध-प्रयोगोच्च-दक्षतात्मकम् | ३ | - | - | ३ | - | - | - | २५ | - | - | - | ८ | १२ | ३९ | **ज्ञानबोध**क्षेत्रतः-<br>हलन्तपुँल्लिङ्गप्रकरणस्य जान्तशब्दान्तभागतो ज्ञानसम्बद्धः एकः, बोधसम्बद्धौ द्वौ चेति कृत्वा त्रयः प्रश्नाः ।<br>हलन्तपुँल्लिङ्गप्रकरणस्य दान्तशब्दादिभागतो ज्ञानसम्बद्धः एकः प्रश्नः ।<br>हलन्तस्त्रीलिङ्गप्रकरणतो बोधसम्बद्ध एकः प्रश्नः ।<br>हलन्तनपुंसकलिङ्गप्रकरणतो ज्ञानसम्बद्ध एकः प्रश्नः ।<br>**शिल्प**क्षेत्रतः-<br>हलन्तपुँल्लिङ्गप्रकरणस्य दान्तशब्दादिभागतः ससूत्रं प्रयोगसिद्धिप्रक्रियाप्रदर्शनसम्बद्ध एकः, शब्दरूपावलिलेखनसम्बद्धः सूत्रकार्यलेखनसम्बद्धः कार्यविधायकसूत्रलेखनसम्बद्धः सूत्र-परिभाषार्थलेखनसम्बद्धः शङ्कासमाधानसम्बद्धो वोपप्रश्नद्वयात्मक एकः प्रश्नः ।<br>हलन्तस्त्रीलिङ्गप्रकरणतः ससूत्रं प्रयोगसिद्धिप्रकारलेखनसम्बद्ध एकः प्रश्नः ।<br>हलन्तनपुंसकलिङ्गप्रकरणतः विशेषसूत्रप्रदर्शनपुरःसरं रूपसिद्धिप्रकारनिदर्शनसम्बद्ध एकः प्रश्नः ।<br>अव्ययप्रकरणतोऽव्ययस्य लक्षणार्थपर्यायलेखनसम्बद्धोऽव्ययपदस्य वाक्ये प्रयोगनिदर्शनसम्बद्धोऽव्यसंज्ञाविधायकसूत्रलेखनसम्बद्धो वोपप्रश्नपञ्चात्मको वा निर्दिष्टकारिकाव्याख्यानसम्बद्धः ससूत्रमव्ययस्य पदत्वसाधनसम्बद्धो वा एकः प्रश्नः ।<br>**उच्चदक्षता**क्षेत्रतः-<br>हलन्तपुँल्लिङ्गप्रकरणस्य जान्तशब्दान्तभागतः सूत्रार्थसङ्घटनपुरःसरं प्रयोगसिद्धिप्रकारप्रदर्शनसम्बद्धो वैकल्पिकैकप्रश्नसहित एकः प्रश्नः । |
| योगः | | | ५ | | | ६ | | | | ४० | | | | २४ | २२ | ७५ | |

कवर्गे नव्यव्याकरणविषयमवलम्ब्य अधीयानां छात्राणां कृते व्याकरणस्थाने न्यायविषयस्य निम्नाङ्किता विशिष्टीकरणतालिका अवलम्बनीया

| क्र.स. | विषयक्षेत्रम् (पठनं लेखनञ्च) | प्रश्नप्रकृतिः | ज्ञानम् (१×१=१) | | | बोधः (१×१=१) | | | शिल्पम् (१×५=५) | | | उच्च- दक्षता (१×८=८) | | | प्रष्टव्याः प्रश्न सङ्ख्याः | अङ्क भारः | स्पष्टीकरणम् |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | क | ख | ग | क | ख | ग | क | ख | ग | क | ख | ग | | | |
| १. | न्यायवैशेषिकशास्त्रयोः प्रथिताः केचन पारिभाषिकशब्दाः | ज्ञान-बोधात्मकम् | २ | - | - | २ | - | - | - | - | - | - | - | - | ४ | ४ | **ज्ञानबोध**क्षेत्रतः-<br>ज्ञानात्मकौ द्वौ, बोधात्मकौ द्वौ चेति कृत्वा चत्वारः प्रश्नाः । |
| २. | अनुमानप्रमाणम् | प्रयोगोच्चदक्षतात्मकम् | - | - | - | - | - | - | - | ५ | - | - | - | ८ | २ | १३ | **शिल्प**क्षेत्रतः-<br>प्रयोगात्मकशिल्पप्रदर्शनसम्बद्ध एकः प्रश्नः ।<br>**उच्चदक्षता**क्षेत्रतः-<br>निर्दिष्टविषयवस्तुनः सोदाहणमन्यमतनिरसनपुरःसरञ्च व्याख्या-निरूपण-तर्कोपस्थापन-समालोचनदक्षताप्रदर्शनसम्बद्धो वैकल्पिकैकप्रश्नसहित एकः प्रश्नः । |
| ३. | हेत्वाभासः | ज्ञान-बोधोच्च-दक्षतात्मकम् | - | - | - | - | - | - | - | १० | - | - | - | - | २ | १० | **शिल्प**क्षेत्रतः-<br>पठितविषयवस्तूनां प्रयोगशिल्पप्रदर्शनसम्बद्धौ द्वौ प्रश्नौ । |
| ४. | उपमानप्रमाणम् शब्दप्रमाणञ्च | बोधप्रयोगात्मकम् | - | - | - | १ | - | - | - | ५ | - | - | - | - | २ | ६ | **बोध**क्षेत्रतः-<br>बोधात्मक एकः प्रश्नः ।<br>**शिल्पक्षेत्रतः-**<br>अधीतविषयस्य प्रयोगकौशलप्रदर्शनसम्बद्ध एकः प्रश्नः । |
| ५. | अयथार्थानुभवः, सुखादिगुणाः, कर्मादिपदार्थाश्च | प्रयोगात्मकम् | १ | - | - | - | - | - | - | ५ | - | - | - | - | २ | ६ | **ज्ञान**क्षेत्रतः-<br>ज्ञानात्मक एकः प्रश्नः ।<br>**शिल्प**क्षेत्रतः-<br>प्रयोगात्मक एकः प्रश्नः । |
| योगः | | | २ | | | ३ | | | | २५ | | | | ८ | ११ | ३९ | |

**द्रष्टव्यः** 'क' इत्यनेन अतिलघुप्रश्नो बोध्यः ।

'ख' इत्यनेन लघुप्रश्नो बोध्यः ।

'ग' इत्यनेन सामान्यतया विस्तृतोत्तरापेक्षी (व्याख्यात्मकः) प्रश्नो बोध्यः।

**पुनश्च** - ज्ञानबोधक्षेत्रात् विकल्परहिताः प्रश्नाः प्रष्टव्याः । शिल्पक्षेत्रात् यथेच्छप्रकरणतः प्रश्नद्वयं संयोज्य आहत्य दश प्रश्नाः प्रष्टव्याश्चेत् उच्चदक्षताक्षेत्रात् यथेच्छं प्रकरणतो द्वौ प्रश्नौ संयोज्य आहत्य चत्वारः प्रश्नाः प्रष्टव्याः । आहत्य तेषु दशसु छात्रैरष्टौ प्रश्नाः समाधेयाश्चेत्पञ्चसु त्रयः प्रश्नाः समाधेयाः ।

निदर्शनप्रश्नाः

## संस्कृतभाषाव्याकरणम्

**कक्षा** १०　　　　**पूर्णाङ्काः** ७५

**समयः** घण्टात्रयम्

### समूहः 'क'

**अधस्तनप्रश्नानामविस्तरेणोत्तरं लिखत**　　　　**११×१=११**

**भाषाखण्डः (सर्वेषां कृते)**

१.　कणादेन प्रतिपादितं दर्शनं किम् ?

२.　मालिनीच्छन्दसो लक्षणं लिखत ।

३.　'सोऽकथयत्' इत्यस्य सन्धिं विच्छेदयत ।

४.　पञ्चचामरवृत्तस्योदाहरणं विलिखत ।

५.　'स्वयंकृताः' इत्यस्य व्युत्पत्तिं प्रदर्शयत ।

**व्याकरणखण्डः (कवर्गे नव्यव्याकरणेतरविषयमवलम्ब्य अधीयानां छात्राणां कृते)**

६.　'एकाचो...' इति सूत्रं पूरयत ।

७.　'ङेप्रथमयोरम्' इति सूत्रेण केषाममादेशो विधीयते ?

८.　'तुदन्ती' इत्यत्र केन सूत्रेण नुमागमो भवति ?

९.　सम्प्रसारणे केषां स्थाने के भाव्यन्ते ?

१०.　नकारान्तशब्देषु जायमानं भ्यामादौ पदसंज्ञाप्रयुक्तं सम्बुद्धिप्रयुक्तं चैकैकं कार्यं लिखत ।

११.　'वाक्षु' इत्यत्र प्रातिपदिकविभक्ती निर्दिशत ।

**न्यायखण्डः (कवर्गे नव्यव्याकरणविषयमवलम्ब्य अधीयानां छात्राणां कृते)**

६.　पर्वतो वह्निमान् धूमादित्यत्र साध्यं किम् ?

७.　अन्वयो नाम किम् ?

८.　किन्नाम व्याप्यत्वम् ?

९.　विपक्षः कः ?

१०.　शाब्दबोधे करणं किम् ?

११.　संस्कारः कतिविधः ?

### समूहः 'ख'

**अधस्तनप्रश्नानां नातिविस्तरेणोत्तराणि लिखत**　　　　**८×५=४०**

**भाषाखण्डः (सर्वेषां कृते)**

**१२.　संस्कृतवाक्यस्य नेपालिभाषायां नेपालिवाक्यस्य च संस्कृतेऽनुवादं विधत्त**

(क)　मध्यमा जना धनं मानञ्चेच्छन्ति ।

(ख)　गुणाः शत्रोरपि ग्राह्या भवन्ति ।

(ग) बाबुको भन्दा आमाको महत्त्व धेरै हुन्छ ।

(घ) नेपाल प्राकृतिक तथा सांस्कृतिक सम्पदाले धनी देश हो ।

(ङ) तिलिचो संसारको सबैभन्दा उचाइमा रहेको ताल हो ।

**अथवा**

**कोष्ठस्थनिर्देशनानुसारेण वाक्यस्य परिवर्तनं पूरणं वा कुरुत**

(क) बालाः शृगालाद् बिभ्यति । (एकवचने)

(ख) गावो वनम् ................ । (गम्- लङ्लकारे)

(ग) वयं कवितां शृण्मः । (कर्मवाच्ये)

(घ) शिक्षकः ................ गृहकार्यमदात् । (छात्र- सम्प्रदानकारके)

(ङ) ................ विना जनोऽन्धो भवति । (विद्या- तृतीयाविभक्तौ)

**१३. प्राणायमस्य महत्त्वं वर्णयत ।**

**अथवा**

**आहारसंयमाभावस्य हानीः सूत्ररूपेण लिखत ।**

**१४. (क) अधस्तनपद्यस्य अन्वयं लिखत**

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोस्त्वकर्मणि ॥

**(ख) प्रदत्तं पद्यं पठित्वा तदनुवर्तिनः प्रश्नानुत्तरयत**

अधमा धनमिच्छन्ति धनमानौ तु मध्यमाः ।
उत्तमा मानमिच्छन्ति मानो हि महतां धनम् ॥

(अ) अधमा जनाः किमिच्छन्ति ?

(आ) महतां धनं किं विद्यते ?

(इ) ‘धनमानौ’ इति पदस्य विग्रहवाक्यं किम् ?

**व्याकरणखण्डः (कवर्गे नव्यव्याकरणेतरविषयमवलम्ब्य अधीयानां छात्राणां कृते)**

१५. यूयम्, विदुषः, धीमान्, एषु द्वौ प्रयोगौ ससूत्रं साधयत ।

१६. अस्मद्-शब्दस्य सर्वाणि रूपाणि लिखत ।

**अथवा**

‘अदसोऽसेर्दादु दो मः’, ‘कृदतिङ्’ इत्यनयोः सूत्रयोः सोदाहरणमर्थं लिखत ।

१७. इयम्, अद्भिः, का, एषु द्वयोः ससूत्रं सिद्धिप्रक्रियां दर्शयत ।

१८. कानि, अहोभ्याम्, धनुः, एषु द्वयोः ससूत्रं साधुत्वप्रकारं प्रदर्शयत ।

१९. अधस्तनेष्वव्ययपदेषु पञ्चानामेव वाक्येषु प्रयोगं दर्शयत
नूनम्, दिवा, युगपत्, कृत्वा, नीचैः, मिथ्या, पुरा

**न्यायखण्डः (कवर्गे नव्यव्याकरणविषयमवलम्ब्य अधीयानां छात्राणां कृते)**

१५. केवलान्वयिनो लिङ्गस्य लक्षणं सोदाहरणं प्रस्तुत ।

१६. शाब्दबोधस्य करणव्यापारौ निर्दिश्य किञ्चनैकमुदाहरणं प्रस्तुत ।

**अथवा**

जहल्लक्षणाया लक्षणं सोदाहरणं समन्वयं कुरुत ।

१७. सव्यभिचारः कतिविधः ? प्रत्येकमुदाहरणं लिखत ।

१८. असिद्धभेदान् प्रस्तुत्य स्वरूपासिद्धस्य दृष्टान्तं दत्त ।

१९. कर्मभेदान् प्रस्तुत्योत्क्षेपणस्य लक्षणं लिखत ।

**समूहः 'ग'**

**अधस्तनप्रश्नानामुत्तराणि लिखत** **३×८=२४**

**भाषाखण्डः (सर्वेषां कृते)**

२०. (क) पाठस्थपौराणिककथायाः सारांशं लिखत ।

(ख) पाठस्थनीतिकथायाः सन्देशं प्रकाशयत ।

**अथवा**

**प्रदत्तानि सूत्राण्याधृत्य जीवनवृत्तं रचयत**

**प्रसिद्धनाम** - डा. स्वामी प्रपन्नाचार्यः

**पूर्वाश्रमनाम** - काले राई

**जन्म** - १९८० तमस्य वैक्रमाब्दस्य कार्तिकमासस्य ३ तमे दिनाङ्के

**जन्मस्थानम्** - पाँचथरजनपदस्य लालीखर्क, वरडाँडा

**मातापितरौ** - दिलकुमारी/धम्बे राई

**औपचारिकी शिक्षा** - विद्यावारिधिपर्यन्तम्, वनारससंस्कृतविश्वविद्यालयतः । वयसस्त्रिंशद्वर्षादध्ययनमारब्धम् ।

**अध्ययनस्य मूलक्षेत्रम्** - वेदान्तदर्शनम्

**प्रसिद्धिः** - संस्कृतसेवी, आध्यात्मिकानुसन्धाता, सामान्यजनजीवने प्राचीनस्यार्यदर्शनस्य प्रस्तोता, सन्न्यासी, आध्यात्मिको नेता

**प्रकाशितकृतयः** - वेदमा के छ ?, सन्मार्गदर्शनम्, प्राचीन हिन्दुविज्ञान, प्राचीन किरात इतिहास, मानवअधिकार हनन के हो ? कार्तवीर्योदयमहाकाव्यम् इत्यादि ।

**प्रेरककर्माणि** - सकलपारिवारिकबन्धेभ्यो मुक्तो भूत्वा परोपकारायैव स्वजीवनस्य समर्पणम्, धर्मसंस्कृतेः संरक्षणाय प्रचाराय च महद्योगदानम्, पौरस्त्यदर्शनस्य प्रचारः ।

**मानपदव्यः** - मदनपुरस्कारः, पाणिनिपुरस्कारः, गुणराजपुरस्कारः, आदिशङ्कराचार्यपुरस्कारः, अन्येऽपि विविधपुरस्काराः ।

**ब्रह्मलीनः** - २०७२ तमस्य वैक्रमाब्दस्य भाद्रमासस्य ४ तमे दिनाङ्के ।

**२१. अधस्तनपद्यस्य सप्रसङ्गं व्याख्यां कुरुत**

धूमज्योतिः सलिलमरुतां सन्निपातः क्व मेघः
सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः ।
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे
कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ॥

**व्याकरणखण्डः (कवर्गे नव्यव्याकरणेतरविषयमवलम्ब्य अधीयानां छात्राणां कृते)**

२२. चतुर्ण्णाम्, राज्ञः, मघोनः, एषु द्वौ प्रयोगौ ससूत्रं साधयत ।

**अथवा**

विश्वौहः, एभिः, हे अनड्वन्, एषु द्वयोः प्रयोगयोः सूत्रार्थसङ्घटनपूर्वकं साधनं विधत्त ।

**न्यायखण्डः (कवर्गे नव्यव्याकरणविषयमवलम्ब्य अधीयानां छात्राणां कृते)**

२२. पञ्चावयववाक्यानि कानि सोदाहरणं प्रस्तुत ।

अथवा

स्वार्थानुमितेः क्रममुदाहरणसहितं लिखत ।

-o-